M.A. Sanskrit
Year – I
Semester – I
Paper - III

# न्यायबोधिनीसहित-तर्कसङ्ग्रहः अर्थसङ्ग्रहश्च

# Tarkasangraha with Nyayabodhini
# Artha sangraha

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संस्कृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# न्यायबोधिनीसहित-तर्कसङ्ग्रहः

# अर्थसङ्ग्रहश्च

# Tarkasangraha with Nyayabodhini

# Artha sangraha

## पाठ्यपरिचयः

भारतीयशास्त्रीयपरम्परायाम् बहूनि दर्शनानि प्रसिद्धानि । तेषु मुख्यतः भागद्वयं विद्यते- आस्तिकदर्शनानि, नास्तिकदर्शनानि च । अत्र आस्तिकपदेन यानि दर्शनानि वेदस्य प्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि यानि च दर्शनानि वेदस्य प्रामाण्यं न स्वीकुर्वन्ति तानि नास्तिकदर्शनानि इति उच्यन्ते। सांख्यं-योग-न्याय-वैशेषिक-पूर्वमीमांसोत्तरमीमांसाख्यानि षडास्तिकदर्शनानि प्रसिद्धानि।

तादृशमहत्वपूर्णेषु दर्शनेषु ज्ञानसंपादनाय अस्मिन्पाठे न्यायपूर्वमीमांसादर्शनयोः प्रकरणग्रन्थौ स्थापितौ भवतः। तत्र न्यायशास्त्रे छात्राणां व्युत्पत्तिसंपानाय सत्स्वपि अनेकेषु ग्रन्थेषु तर्कसंग्रहग्रन्थ एव जगति पठनपाठनसम्प्रदाये प्रसिद्धः दृश्यते । स च ग्रन्थः न्यायशास्त्रीयपदार्थानां तथा प्रमेयानां प्रमाणानां च संक्षेपेण प्रतिपादयति। तस्य अनेकानि व्याख्यानानि सन्ति। तत्र अन्यतमं भवति गोवर्धनसुधीकृत- "**न्यायबोधिनी**"- इत्याख्यं व्याख्यानम्। अस्मिन् व्याख्याने सरलतया तर्कसंग्रहस्थविषयाः निरूपिताः भवन्ति। अपेक्षितस्थलेषु रमणीयशैल्या छात्राणां न्यायशास्त्रे प्रविविशूनां च कृते उपकाराय अधिकांशाः अपि योजिताः भवन्ति। एतस्य अध्ययनेन छात्राणां न्यायशास्त्रीयप्रमेयाणां परिचयो निश्चयेन भवति। आदितः खण्डत्रयपर्यन्तमयं ग्रन्थः स्थापितः वर्तते।

ततः परं मीमांसादर्शने ज्ञानसंपादनाय अर्थसंग्रहाख्यः प्रकरणग्रन्थः समग्रतया अत्र पाठ्यते। पूर्वमीमांसादर्शनं कर्मकाण्डात्मकस्य वेदभागस्य विचाराय प्रवृत्तम् । अर्थात् वेदस्य कर्मकाण्डे विहितानां विषयाणां यत्र चर्चा भवति, यत्र च वेदविहितेषु विषयेषु संशये सति समाधानं लभ्यते तदेव पूर्वमीमांसादर्शनम्। धर्मजिज्ञासा एव तत्र मुख्यः विषयः।एवमेव मीमांसाग्रन्थाः विधिनिरूपणे व्यापृताः भवन्ति इति कारणात् विधिविचारोपि अत्र सङ्क्षेपेण कृतः। अन्तिमखण्डद्वयेन अयं ग्रन्थः पाठ्यते।

## प्रथमखण्डपरिचयः

अस्मिन् खण्डे तर्कसंग्रहस्य न्यायबोधिनीसहितस्य परिचयः संक्षेपेण क्रियते। अत्र न्यायशास्त्रीयप्रमाणेषु प्रत्यक्षानुमाने पाठ्यरूपेण भवतः। तत्रापि मङ्गलस्य समाप्तिसाधनत्वं, शक्तेः अतिरिक्तपदार्थत्वखण्डनं, तमोवादः,पाकविचारः, रूपलक्षणं,कारणत्वविचारः, कारणत्रैविध्यं, सन्निकर्षविचारः, परामर्शः, व्याप्तिः, परार्थानुमानं, हेत्वाभासः इत्यादयः प्रतिपादिताः। एतेषामध्ययनेन छात्राणां न्यायशास्त्रीयप्रसिद्धप्रत्यक्षानुमानसंबद्धप्रमेयानां ज्ञानं भवति।

## द्वितीयखण्डपरिचयः

अस्मिन् खण्डे तर्कसंग्रहे उपमानखण्डात् शब्दखण्डान्तभागः पाठ्यते। उपमानं न्यायशास्त्रे एव पृथक्प्रमाणतया स्वीकृतं भवति इति तस्य स्वरूपं अत्र विचार्यते। ततः परं शब्दखण्डे शक्तिविचारः, लक्षणाविचारः, लक्षणायाः त्रैविध्यं, शाब्दसामग्र्यः च विचारिताः। वेदस्य नैयायैकमते ईश्वरोक्तत्त्वेन प्रामाण्यं तथा पौरुषेयत्वमपि अङ्गिकृतं भवति। तद्विषयेपि छात्राणां विशेषेण ज्ञानं भवति। एवं शाब्दबोधपरिचयोपि संक्षेपेण भवति ।

## तृतीयखण्डपरिचयः

अस्मिन् खण्डे अयथार्थानुभवभागात् ग्रन्थसमाप्तिपर्यन्तभागः पाठ्यते। आदौ अयथार्थानुभवस्य त्रेधा विभागः भवति। ततः परं क्रमेण अन्येषां गुणानां विवरणं भवति।ततः कर्मणः निरूपणं, सामान्यस्य निरूपणं,विशेषस्य लक्षणं, समवायस्य निरूपणं, अभावनिरूपणं,अन्ते च तत्वज्ञानादेव मोक्षसिद्धिः इति च निरूपितम् भवति। अस्मिन्नेव खण्डे भावनाख्यसंस्कारस्य लक्षणं विस्तरेण विचारितमिति छात्राणामत्यन्तोपकारः भवति।

## चतुर्थखण्डपरिचयः

अस्मिन् खण्डे मीमांसाशास्त्रपरिचयाय तच्छास्त्रीयप्रकरणग्रन्थः अर्थसंग्रहाभिधः पाठ्यते। तत्रापि ग्रन्थारम्भभागात् अधिकारविधिपर्यन्तभागः पाठ्यक्रमे भवति। आदौ धर्मलक्षणं विचार्य तत्प्रसंगात् बहवः विषयाः प्रतिपादिताः। यथा वेदस्य पञ्चधा विभागः, अङ्गताबोधकप्रमाणानि, तेषां परस्परम् प्राबल्यदौर्बल्यविचारः, विधिचातुर्विध्यम्, तेषां अवान्तरविभागः इत्यादयः मीमांसाशास्त्रीय-असाधारणविषयाः प्रतिपादिताः। तेषामध्ययनेन छात्राणां मीमांसाशास्त्रीयतत्त्वेषु प्राथमिकपरिचयो भवति। तेन उपरि अध्ययनाय रुचिरिपि उत्पद्यते।

## पञ्चमखण्डपरिचयः

अस्मिन् खण्डे मन्त्रविचारात् ग्रन्थान्तभागः पाठ्यते। अत्रैव अपूर्वविधिः, नियमविधिः,परिसंख्याविधिरपि प्रसंगात् निरूपितो भवति। ततः नामधेयविचारः, तत्रैव तत्प्रख्यशास्त्रस्य परिचयः, ततः निषेधः, अर्थवादः, अर्थवादप्रभेदाः च निरूपिताः। एतदध्ययनेन छात्राणां मीमाम्साशास्त्रे प्रवेशः सुलभतया भवति। एवमेव वेदार्थाः अपि संक्षेपेण ज्ञायन्ते इति खण्डस्य अस्य विषयः वर्तते।

| खण्डः | विषयः | पुटसंख्या |
|---|---|---|
| **प्रथमखण्डः** | न्यायबोधिनीयुक्ततर्कसंग्रहः–आदितः अनुमान्खण्डान्तभागः | 8-48 |
| **द्वितीयखण्डः** | न्यायबोधिनीयुक्ततर्कसंग्रहः - उपमानशब्दखण्डौ | 49-57 |
| **तृतीयखण्डः** | न्यायबोधिनीयुक्ततर्कसंग्रहः-अयथार्थानुभवात् ग्रन्थान्तभागः | 58-69 |
| **चतुर्थखण्डः** | अर्थसंग्रहः – आदितः अधिकारविधिपर्यन्तभागः | 70-92 |
| **पञ्चमखण्डः** | अर्थसंग्रहः –मन्त्रनिरूपणात् ग्रन्थान्तभागः | 93-108 |

# तर्कसंग्रहः- न्यायबोधिनी

## खण्डः 1

**पाठपरिचयः**

- प्रस्तावना
- उद्देश्यम्
- मूलम्
- विषयसारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

"प्रदीपः सर्वविद्यानां" इत्यादिना सर्वशास्त्रोपकारकत्वेन प्रसिद्धं भवतिन्यायशास्त्रम्। गौतममुनिप्रभृतिभिः अनेकैः ग्रन्थकारैः न्यायशास्त्रसम्बद्धाः अनेके ग्रन्थाः रचिताः सन्ति। सत्स्वपि तावद्ग्रान्थेषु छात्राणां सरलतया ज्ञानसम्पादनं न भवति इति हेतोः अन्नंभट्टेन सरलबोधाय तर्कसंग्रहः रचितः। तस्य ग्रन्थस्य जगति प्रसिद्धत्वात् अनेकानि व्याख्यानानि सन्ति। तत्र न्यायबोधिनी अपि अन्यतमा भवति। अस्मिन् खण्डे न्यायबोधिनीयुक्ततर्कसंग्रहस्थप्रत्यक्षानुमानखण्डे भवतः। तत्र आदौ मङ्गलवादे मङ्गलस्य समाप्तिसाधनत्वं स्थापितम्। ततः सप्तपदार्थनिरूपणप्रकरणे शक्तेः अतिरिक्तपदार्थत्वमाशङ्क्य निराकृतम्। ततः तमसः अतिरिक्तद्रव्यत्वमाशङ्क्य निराकृतं तस्य तेजोभावत्वमपि स्थापितम्।ततः पाकविचारः, विस्तरेण रूपलक्षणनिर्वचनं, यथार्थाऽयथार्थानुभवलक्षणपरिष्करणं ,ततः कारणत्वविचारः, सन्निकर्षविचारः, परामर्शविचारः, पूर्वपक्षव्याप्तिलक्षणपरिष्करणं, सिद्धान्तव्याप्तिलक्षणपरिष्करणं, हेत्वाभासानां निरूपणमित्यादिविचाराः अत्र चर्चिताः।

## उद्देश्यम्

- तर्कशास्त्रीयप्रमेयाणां सरलतया ज्ञानं प्राप्नोति
- मङ्गलस्य किं प्रयोजनमिति अवगच्छति
- तर्कशास्त्ररीत्या सप्तपदार्थानां विषये ज्ञानं भवति
- कारणप्रभेदान् संक्षेपेण जानाति
- प्रत्यक्षानुमानप्रमाण्योः यथास्थिति स्वरूपमवगच्छति

**तर्कसंग्रहः**

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**

**बालानां सुखबोधाय क्रियते तर्कसंग्रहः।।**

**न्यायबोधिनी**

**(निखिल)अखिलागमसंचारि श्रीकृष्णाख्यं परं महः।**

**ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम्॥**

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निबध्नाति- **निधायेति**।

**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः।**

अथ पदार्थान्विभजते - **द्रव्येति**। अत्र सप्तग्रहणं पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्याप्तिलाभाय। ननु शक्तिपदार्थस्याष्टमस्य सत्त्वात्कथं सप्तैवेति। तथाहि वह्निसंयुक्तेन्धनादौ सत्यपि मणिसंयोगे दाहो न जायते। तच्छून्ये तु जायते। अतो मणिसमवधाने दाहानुकूला शक्तिर्नश्यति। मण्यभावदशायां दाहानुकूला शक्तिरुत्पद्यते। तस्माच्छक्तिरतिरिक्तः पदार्थ इति चेन्न। मणेः प्रतिबन्धकत्वेन तदभावस्य कारणत्वेनैव निर्वाहे मण्यसमवधानसमवधानाभ्यामनन्तशक्तितत्प्रागभावतध्वंसकल्पनाया अन्याय्यत्वात्। तस्मात्सप्तैव पदार्था इति सिद्धम्।

**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। रूपरसगन्धस्पर्श-संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि। परमपरं चेति द्विविधं सामान्यम्। नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव। समवायस्त्वेक एव। अभावश्चतुर्विधः। प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति।**

द्रव्याणि विभजते- **पृथिव्यप्तेज** इति। नन्वन्धकारस्य दशमद्रव्यस्य सत्त्वात्कथं **नवैवे**ति। तथा हि नीलं तमश्चलतीति प्रतीत्या नीलरूपाश्रयत्वेन क्रियाश्रयत्वेन च तमसोद्रव्यत्वं सिद्धम्। न च क्लृप्तद्रव्येष्वन्तर्भावात्कुतो दशमद्रव्यत्वमिति वाच्यम्। तमसो रूपवत्वात् आकाशादिपञ्चकस्य नीरूपत्वात् वायोश्च नीरूपत्वान्न तेष्वन्तर्भावः। तमसो निर्गन्धत्वात्, पृथिव्या गन्धवत्वात् न तत्रान्तभावः। तमसो निस्स्पर्शत्वात् जलतेजसोः शीतोष्णस्पर्शवत्वान्न तयोरन्तर्भावः। तस्मातमसो दशमद्रव्यत्वं सिद्धमिति चेन्न। तमसस्तेजोऽभावत्वेनैवोपपत्तावतिरिक्तत्वकल्पनायां मानाभावात्। न च विनिगमनाविरहात्तेज एव अन्धकाराभावस्वरूपः इति वाच्यम्। तेजसोऽभावरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयद्रव्यान्तरकल्पने गौरवात्। तस्मादुष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धम्। तमसि नीलप्रतीतिस्तु भ्रान्तिरेव, एवं कर्मवत्ताप्रतीतिरपि, दीपापसरणक्रियाया एव तत्र भानात्।

**तत्र गन्धवती पृथिवी। सा द्विविधा, नित्यानित्या चेति। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं तच्च नासाग्रावर्त्ति। विषयो मृत्पाषाणादिः।**

**शीतस्पर्शवत्य आपः। ताश्च द्विविधाः। नित्या अनित्याश्चेति। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं तच्च जिह्वाग्रवर्त्ति। विषयः सरित्समुद्रादिः।**

**उष्णस्पर्शवत्तेजः। तद्विविधम्। नित्यमनित्यं चेति। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः तच्च कृष्णताराग्रवर्त्ति। विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादि। दिव्यमबिन्धनं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि।**

**गन्धवतीति**। गन्धवत्वं पृथिव्या लक्षणम्। लक्ष्या पृथिवी। पृथिवीत्वं लक्ष्यतावच्छेदकम्। पृथिवीत्वावच्छिन्ना लक्ष्यता। यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः। यो धर्मो यस्यामवच्छेदकः सा तद्धर्मावच्छिन्नेति न्यायात्। तथा च लक्ष्यतावच्छेदकं पृथिवीत्वं, पृथिवीत्वावच्छिन्ना लक्ष्यता॥ एवं शीतस्पर्शवत्त्वादिलक्षणेषु जलादीनां लक्ष्यता, जलत्वादीनां लक्ष्यतावच्छेदकत्वं च बोध्यम्।

**रूपरहितस्पर्शवान्वायुः। स द्विविधः। नित्योऽनित्यश्चेति। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवृत्तिः। विषयो वृक्षादिकम्पनहेतुः वायुः। शरीरान्तःसंचारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात्प्राणापादानादिसंज्ञां लभते।**

एवं पृथिव्यादित्रिकं निरूप्य वायुं निरूपयति- **रूपरहितेति**। रूपरहितत्वे सति स्पर्शवत्वं वायोर्लक्षणम्। सामानाधिकरण्यसंबन्धेन रूपत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टस्पर्शवत्त्वं लक्षणमिति फलितार्थः। विशेषणानुपादाने पृथिव्यादित्रिकेऽतिव्याप्ति, तत्रापि स्पर्शवत्वसत्वात्। अतस्तद्वारणाय विशेषणोपादानम्। तावन्मात्रोपादाने आकाशादावतिव्याप्तिः, तत्रापि रूपरहितत्वसत्त्वात्। अत उक्त स्पर्शवत्वमिति। अतिव्याप्तिर्नाम अलक्ष्ये लक्षणस्य सत्त्वम्। यथा गोः श्रृङ्गित्वं लक्षणं उक्तं चेदलक्ष्यभूतगोभिन्नमहिषादावतिव्याप्तिस्तत्रापि श्रृङ्गित्वस्य सत्त्वात्। अव्याप्तिर्नाम लक्ष्यैकदेशावृत्तित्वम्। लक्ष्यतावच्छेदकाश्रये क्वचिल्लक्ष्ये लक्षणासत्वमेवाव्याप्तिरित्यर्थः। यथा गोर्नीलरूपवत्वं लक्षणमुक्तं चेत् श्वेतगवि नीलरूपाभावात् अव्याप्तिः। असंभवो नाम लक्ष्यमात्रे कुत्रापि लक्षणासत्वम्। यथा गोरेकशफवत्त्वम् लक्षणमुक्तं चेत् गोसामान्यस्य द्विशफवत्त्वेन एकशफवत्वस्य कुत्राप्यसत्त्वादसंभवः। अतिव्याप्त्यव्याप्त्यसंभवानां निष्कृष्टलक्षणन्तु लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमतिव्याप्तिः। लक्ष्यतावच्छेदकसमानाधि -

करणत्वे सति लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् अव्याप्तिः। लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् असंभव इति।

**शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।**

आकाशं लक्षयति- **शब्दगणकमिति**। अत्र गुणपदमाकाशे शब्द एवं विशेषगुण इति द्योतनाय न त्वतिव्याप्तिवारणाय। समवायेन शब्दवत्त्वमात्रस्य सम्यक्त्वात्। तदुक्तं –

'रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।

बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः।' इति।

**तच्चैकमि**ति। अनेकत्वे मानाभावादिति भावः। **विभ्वि**ति। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं च क्रियाश्रयत्वम्। पृथिव्यप्तेजोवायुमनांसि मूर्तानि। पृथिव्यप्तेजोवाय्वाकाशपञ्चकं भूतपदवाच्यम्। भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्।

**अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।**

कालं लक्षयति - **अतीते**ति। व्यवहारहेतुत्वस्य लक्षणत्वे घट इति व्यवहारहेतुभूतघटादावतिव्याप्तिः। तद्वारणाय **अतीतादी**ति।

**प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका विभ्वी नित्या च।**

दिशो लक्षणमाह - **प्राची**ति। उदयाचलसन्निहिता या दिक् सा प्राची। अस्ताचलसन्निहिता या दिक् सा प्रतीची। मेरोः सन्निहिता या दिक् सोदीची। मेरोर्व्यवहिता या दिक् साऽवाची।

**ज्ञानाधिकरणमात्मा। स द्विविधः, जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मैक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।**

आत्मानं निरूपयति - **ज्ञानाधिकरणमि**ति। अधिकरणपदं समवायेन ज्ञानाश्रयत्वलाभार्थम्।

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।**

मनो निरूपयति - **सुखादी**ति। उपलब्धिर्नाम साक्षात्कारः। तथा च सुखदुःखसाक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसो लक्षणम्। इन्द्रियत्वमात्रोक्तो चक्षुरादावतिव्याप्तिः। अतः **सुखे**त्यादि। विशेष्यानुपादाने आत्मन्यतिव्याप्तिः। आत्मनः ज्ञानादिकं प्रति समवायिकारणत्वात्। अत इन्द्रियत्वोपादानम्।

**चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधाम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।**

रूपं लक्षयति- **चक्षुर्मात्रे**ति। चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणम्। विशेष्यमात्रोपादाने रसादावतिव्याप्तिः। अतश्चक्षुर्मात्रग्राह्यत्वविशेषणम्। तावन्मात्रोपादाने रूपत्वनीलत्वादावतिव्याप्तिः। यो गुणो यदिन्द्रियग्राह्यस्तन्निष्ठा जातिरपि तदिन्द्रियग्राह्येति न्यायात्। अतस्तद्वारणाय विशेष्योपादानम्। चक्षुर्मात्रग्राह्यत्वं नाम चक्षुर्भिन्नाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम्। मात्रपदानुपादाने संख्यादावतिव्याप्तिः, संख्यादावपि चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य सत्त्वात्। अतस्तद्वारणाय मात्रपदम्। संख्यादेस्तु चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वाच्चक्षुर्मात्रग्राह्यत्वं नास्ति। अतीन्द्रिये गुरुत्वादावतिव्याप्तिवारणाय **चक्षुर्ग्राह्ये**ति। अत्र ग्राह्यत्वं प्रत्यक्षविषयत्वम्। तथा च त्वाचसाक्षात्काराविषयत्वे सति चाक्षुषप्रत्यक्षविषयत्वमिति फलितोऽर्थः। ननु प्रभाघटसंयोगे रूपलक्षणस्य अतिव्याप्तिः तस्य चक्षुर्मात्रग्राह्यगुणत्वादिति चेन्न। गुणपदस्य विशेषगुणपरत्वात्। न चैवं विशेषगुणत्वघटितलक्षणे संख्यादावतिव्याप्त्यभावान्मात्रपदवैयर्थ्यमिति वाच्यम्। सांसिद्धिकद्रवत्वेऽतिव्याप्तिवारणाय तदुपादानात्।

अथ वा चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य लक्षणत्वान्न प्रभाघटसंयोगादावतिव्याप्तिः। संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात्। घटपटसंयोगस्य त्वगिन्द्रियग्राह्यत्वेन तद्गतजातेरपि त्वगिन्द्रियग्राह्यत्वात्। अत्र जातिघटितलक्षणे गुणत्वानुपादाने चक्षुर्मात्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिरतस्तद्वारणाय तदुपादानम्।

**रसनग्राह्यो गुणो रसः। स च मधुरामललवणकटुकषायतिक्तभेदात्षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।**

**घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्चेति। पृथिवीमात्रवृत्तिः।**

एवं रसादिलक्षणं विशेषणानुपादाने लक्ष्यभिन्नगुणादावतिव्याप्तिः। विशेष्यानुपादाने लक्ष्यवृत्तिरसत्वादावतिव्याप्तिः। अतो विशेषणविशेष्योरुभयोरुपादानम्।

**त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स त्रिविधः शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतं जले। उष्णास्तेजसि। अनुषणाशीतः पृथिवीवाय्वोः।**

स्पर्शं लक्षयति - **त्वगिन्द्रियमात्रे**ति। अत्रापि मात्रपदं संख्यादावतिव्याप्तिवारणाय। अन्यत्सर्वं पूर्ववद्बोध्यम्।

**रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।**

**एकत्वादिव्यवहारहेतुः संख्या। नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।**

**मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्- अणु महत् दीर्घं ह्रस्वं चेति।**

**पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।**

**संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।**

रूपादिचतुष्टयं पृथिव्यां **पाकजमि**ति। एतत्तत्वनिर्णयश्चेत्थम्। पाको नाम विजातीयतेजःसंयोगः। सच नानाजातीयः। रूपजनको विजातीयतेजःसंयोगः। तदपेक्षया रसजनको विजातीयतेजसंयोगः। एवं गन्धजनको विजातीयतेजस्संयोग:। एवं स्पर्शजनकोऽपि तथैव। एवंप्रकारेण भिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः। तथा हि। तृणपुञ्जनिक्षिप्त- आम्रादौ उष्मलक्षणविजातीयतेजःसंयोगात्पूर्वहरितरूपनाशे रूपान्तरस्य पीतरूपादेरेवोत्पतिः। पूर्वरसस्याम्लरसस्यैवानुभवात्। क्वचित्पूर्वरूपसत्त्वेऽपि रसपरावृत्तिर्दृश्यते। विजातीयतेजःसंयोगेन पूर्वतनाम्लनाशे मधुररसस्यानुभवात्। तस्माद्रूपजनकापेक्षया रसजनको विलक्षण एव। एवं गन्धजनकोऽपि विलक्षण एवेत्यङ्गीकार्यः। रूपरसयोरपरावृत्तावपि पूर्वगन्धनाशे विजातीयतेजस्संयोगेन सुरभिगन्धोपलब्धेः। एवं स्पर्शजनकोऽपि पाकवशात्कटिनस्पर्शनाशे मृदुस्पर्शानुभवात्। तस्माद्रूपादिजनका विजातीया एव पाका यथाकार्यमुन्नेयाः। अत एव पार्थिवपरमाणूनामेकजातित्वेऽपि पाकमहिम्ना विजातीयद्रव्यान्तरानुभवः। यथा गोभुक्ततृणादीनामापरमाण्वन्तं भङ्गे तृणारम्भकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशे तदनन्तरं दुग्धे यादृशं रूपादिकं वर्तते तादृशरूपरसगन्धस्पर्शजनकास्तेजःसंयोगा जायन्ते। तदनन्तरं तैरेव तादृशरूपरसादय उत्पद्यन्ते। तादृशरूपादिविशिष्टपरमाणुभिर्दुग्धद्यणुकमारभ्यते। ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः। एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते पाकमहिम्ना। दध्यारम्भकैः परमाणुभिरेव नवनीतादिकमिति दिक्।

**संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः। परापरव्यवहारासाधारणकारणे परत्वापरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे। दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।**

विभागं लक्षयति- **संयोगनाशक** इति। संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम्। विशेषणमात्रोपादाने क्रियायामतिव्याप्तिः, तस्या अपि संयोगनाशकत्वात्। अतस्तद्वारणाय विशेष्यम्।

**आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति। आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद् द्विविधम् सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

गुरुत्वं लक्षयति- **आद्ये**ति। द्वितीयपतनक्रियायां वेगस्यासमवायिकारणत्वात्तत्रातिव्याप्तिः स्यादित्यत **आद्ये**ति। उत्तरत्र स्यन्दने आद्यत्वविशेषणमप्येवं योजनीयम्।

**चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।**

स्नेहं लक्षयति- **चूर्णादी**ति। चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। पिण्डीभावो नाम धारणाकर्षणहेतुभूतो विलक्षणसंयोगः। तादृशसंयोगे स्नेहस्यैवासाधारणकारणत्वं न तु जलादिगतद्रवत्वस्य। तथा सति द्रुतसुवर्णादिसंयोगेन चूर्णादेः पिण्डीभावापत्तेः। अतः स्नेह एव तत्रासाधारणकारणम्। विशेषणमात्रोपादाने कालादावतिव्याप्तिरतस्तद्वारणाय विशेष्योपादानम्। वस्तुतस्तु द्रुतजलसंयोगस्यैव चूर्णादिपिण्डीभावहेतुत्वं स्नेहस्य पिण्डीभावहेतुत्वे मानाभावात्। जले द्रुतत्वविशेषणात्करकादिव्यावृत्तिः।

**श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः। ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।**

शब्दं लक्षयति- **श्रोत्रेति**। शब्दत्वेऽतिव्याप्तिवारणाय गुणपदम्। रूपादावतिव्याप्तिवारणाय **श्रोत्रे**ति। स त्रिविधः संयोगजो विभागजः शब्दजश्चेति। यथा भेरीदण्डसंयोगजन्यो भांकारादिः। हस्ताभिघातसंयोगजन्यो मृदङ्गादिशब्दः। वंशे पाट्यमाने दलद्वयविभागजन्यः पटपटशब्दः। शब्दोत्पत्तिदेशमारभ्य कर्णपर्यन्तं निमित्तपवनेन शब्दधारा जायन्ते। तत्र उत्तरशब्दे पूर्वशब्दः कारणम।

**सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा। स्मृतिरनुभवश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधः। यथार्थोऽयथार्थश्च। तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा रजते इदं रजतमिति ज्ञानम्। सैव प्रमेत्युच्यते। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्ताविदं रजतमिति ज्ञानम्। सैवाप्रमेत्युच्यते।**

बुद्धेर्लक्षणमाह - **सर्वव्यवहारेति**। व्यवहारः शब्दप्रयोगः। ज्ञानं विना शब्दप्रयोगासंभवाच्छब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणम्। बुद्धिं विभजते **स्मृतिरनुभवश्चे**ति। स्मृतिं लक्षयति- **संस्कारेति**। बहिरिन्द्रियाजन्यत्वविशिष्टसंस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणम्। संस्कारजन्यत्वविशेषणानुपादाने अनुभवेऽतिव्याप्तिरतस्तद्वारणाय तदुपादानम्। संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्यम्। ध्वंसं प्रति प्रतियोगिनः कारणत्वात् संस्कारध्वंसेऽपि संस्कारजन्यत्वस्य सत्वात्। प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम्। अनुभवं लक्षयति - **तद्भिन्नमि**ति। तद्भिन्नत्वं नाम स्मृतिभिन्नत्वम्। तथा च स्मृतिभिन्नत्वविशिष्टज्ञानत्वमनुभवस्य लक्षणम्। विशेषणानुपादाने स्मृतावतिव्याप्तिः, विशेष्यानुपादाने घटादावतिव्याप्तिरतस्तद्वारणाय विशेषणविशेष्ययोरुपादानम्।

अनुभवं विभजते - **स द्विविध** इति। यथार्थानुभवं लक्षयति- **तद्वती**ति। तद्वतीत्यत्र सप्तम्यर्थो विशेष्यत्वम्। तच्छब्देन प्रकारीभूतो धर्मो ग्राह्यः। तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति अनुभवत्वं यथार्थानुभवस्य लक्षणम्। उदाहरणम्। रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकं रजते 'इदं

रजतम्' इति ज्ञानम्। तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशाल्यनुभवत्वमिति निष्कर्षः। अन्यथा यथाश्रुत रङ्गरजतयोरिमे रजतरङ्गे इत्याकारकसमूहालम्बनभ्रमेऽतिव्याप्तिः, तत्रापि रजतत्ववद्विशेष्यकत्वरजतत्वप्रकारकत्वयोः रङ्गत्ववद्विशेष्यकत्वरङ्गत्वप्रकारकत्वयोश्च सत्त्वात्।

उक्तनिष्कर्षे तु दर्शितभ्रमे नातिव्याप्तिः, तज्ज्ञानस्य रङ्गांशे रजतत्वावगाहित्वेन रजतांशे रङ्गत्वावगाहित्वेन च रजतत्वप्रकारतायाः रङ्गत्ववन्निष्ठविशेष्यतानिरूपितत्वेऽपि रङ्गत्वनिष्ठप्रकारताया: रजतत्ववन्निष्ठविशेष्यतानिरूपितत्वेऽपि रजतत्वप्रकारताया रजतत्ववन्निष्ठविशेष्यतानिरूपितत्वाभावात् रङ्गत्वप्रकारताया रङ्गत्ववन्निष्ठविशेष्यतानिरूपितत्वाभावाच्च।

अयथार्थानुभवं लक्षयति- **तदभाववती**ति। अत्रापि पूर्ववत्तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशाल्यनुभवत्वं विवक्षणीयम्। अन्यथा यथाश्रुते रङ्गरजतयोरिमे रङ्गरजते इत्याकारकसमूहालम्बनप्रमायामतिव्याप्तिः। एतत्समूहालम्बनस्य रजतरङ्गोभयविशेष्यकत्वेन रजतत्वरङ्गत्वोभयप्रकारकत्वेन च रजतत्वाभाववद्रङ्गविशेष्यकत्वरजतत्वप्रकारकत्वयो रङ्गत्वाभाववद्रजतविशेष्यकत्वरङ्गत्वप्रकारकत्वयोश्च सत्त्वात्। उक्तनिष्कर्षे तु न तत्रातिव्याप्तिः। तादृशप्रमायाः रजतांशे रजतत्वावगाहित्वेन रङ्गांशे रङ्गत्वावगाहित्वेन च रजतत्वप्रकारताया रजतत्वाभाववद्रङ्गनिष्ठविशेष्यतानिरूपितत्वाभावात् रङ्गत्वप्रकारताया रङ्गत्वाभाववद्रजतनिष्ठविशेष्यतानिरूपितत्वाभावाच्च। उदाहरणम्। रजतत्वाभाववद्विशेष्यकत्वे सति रजतत्वप्रकारकं शुक्तौ 'इदं रजतम्' इति ज्ञानम्।

**यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।**

यथार्थानुभवं विभजते- **यथार्थानुभव** इति। **तत्करणमि**ति। फलीभूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः। प्रत्यक्षादिप्रमाणानां प्रमाकरणत्वं सामान्यलक्षणम्। एकैकप्रमाणलक्षणं तु वक्ष्यते प्रत्यक्षज्ञानेत्यादिना।

**असाधारणं कारणं करणम्। कार्यनियतपूर्ववृत्तिकारणम्।**

करणलक्षणमाह- **असाधारणकारणमि**ति। व्यापारवदसाधारणकारणं करणमित्यर्थः। असाधारणकारणत्वं च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्। यथा दण्डादेर्घटं प्रत्यसाधारणकारणत्वम्। कार्यत्वातिरिक्तो घटत्वरूपो धर्मः तदवच्छिन्नकार्यता घटे तन्निरूपितकारणता दण्डे। अतो घटं प्रति दण्डः असाधारणकारणम्। भ्रम्यादिरूपव्यापारवत्त्वाच्च करणम्। साधारणकारणत्वं च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्। यथा ईश्वरादृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात्साधारणकारणत्वम्।

कारणं लक्षयति- **कार्यनियते**ति। कार्यं प्रति नियतत्वे सति पूर्ववर्त्तित्वं कारणत्वम्। नियतत्वविशेषणानुपादाने पूर्ववर्तिनो रासभादेरपि कारणत्वं स्यादतो नियतत्वे सतीति विशेषणम्। नियतपूर्ववर्तिनी दण्डरूपादेरपि घटकारणत्वं स्यादित्यतोऽनन्यथासिद्धत्वमपि कारणलक्षणे निवेशनीयम्। एवं च दण्डरूपादीनाम् अन्यथासिद्धत्वात् न तत्रातिव्याप्तिः।

**कार्यं प्रागभावप्रतियोगि।**

कार्यं लक्षयति- **कार्यमि**ति। प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्। उत्पत्तेः पूर्वं 'इह घटो भविष्यति' इति या प्रतीतिर्जायते तत्प्रतीतिविषयो योऽभावः स प्रागभावः तत्प्रतियोगि घटादिकार्यम्।

**कारणं त्रिविधम्। समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य। पटश्च स्वगतरूपादेः। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य च। तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य। तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।**

कारणं विभजते- **कारणं त्रिविधमिति।** समवायिकारणं लक्षयति- **यत्समवेतमिति**। यस्मिन्समवेतं सत्समवायसम्बन्धेन वर्तमानं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः। उदाहरणम्- **तन्तव** इति। येषु तन्तुषु समवायेन संबद्धं सत्पटात्मककार्यमुत्पद्यते तत्तन्तवः समवायिकारणमित्यर्थः। सामान्यलक्षणं तु समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वमिति। समवायसम्बन्धेन घटाद्यधिकरणे कपालादो कपालादेः तादात्म्यसम्बन्धेनैव कारणत्वात्। समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-कपालत्वाद्यवच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः। समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव हेतुत्वाज्जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणम्। अतो गुणादावपि द्रव्यमेव समवायिकारणमित्याशयेनाह- **पटश्च स्वगतरूपादेरिति**। समवायिकारणमित्यनुषज्यते।

असमवायिकारणं लक्षयति- **कार्येणेति**। असमवायिकारणं द्विविधम्। कार्येण सहैकस्मिन्नर्थे समवेतं सत् कारणमित्येकम्। कारणेन सहैकस्मिन्नर्थे समवेतं सत् कारणं असमवायिकारणमित्यपरमित्यर्थः। अत्र कारणेनेत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः। जन्यद्रव्यमात्रे अवयवसंयोगस्यैवासमवायिकारणत्वात्पटात्मककार्ये तदवयवसंयोगस्यैवासमवायिकारणत्वमिति दर्शयन् प्रथममुदाहरति- **यथा तन्तुसंयोगः पटस्येति**। यथा तन्तुसंयोगः पटात्मककार्येण सहैकस्मिन्नर्थे तन्तौ समवायसम्बन्धेन विद्यमानत्वे सति कारणत्वात् पटात्मककार्यं प्रति तन्तुसंयोगोऽसमवायिकारणमित्यर्थः। द्वितीयमुदाहरति- **तन्तुरूपमिति**। स्वकार्यसमवायिकाणेन पटेन सह एकस्मिन् तन्तौ समवेतत्वे सति कारणत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः। सामान्य लक्षणं तु समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्न-कारणताश्रयत्वम्। समवायसंबन्धावच्छिन्नघटत्वाद्यवच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्न - कपालद्वयसंयोगत्वाद्यवच्छिन्नकारणता कपालद्वयसंयोगादौ वर्तते।

एवमाद्यपतनक्रियायामाद्यस्यन्दनक्रियायां च गुरुत्वद्रवत्वे असमवायिकारणे भवतः। आद्यपतनक्रियां प्रत्याद्यस्यन्दनक्रियां प्रति च समवायसंबन्धेनैव तयोः कारणत्वात्। अवयविगुणभूतघटपटरूपादौ अवयवगुणभूतकपालतन्तुरूपादेः स्वपदग्राह्यकपालरूपतन्तुरूपादिसमवायिकपालतन्त्वादि-समवेतत्वसंबन्धेनैव कारणत्वात् तत्संबन्धावच्छिन्नकारणताश्रयत्वमवयवगुणभूतकपालरूपतन्तुरूपादौ वर्तत इति लक्षणसङ्गतिः। निमित्तकारणं लक्षयति- **तदुभयभिन्नमि**ति। समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणस्य लक्षणमित्यर्थः। करणलक्षणमुपसंहरति- **तदेतदि**ति। यदसाधारणकारणमिति। व्यापारवत्त्वे सतीति पूरणीयम्। अन्यथा कपालतन्तुसंयोगयोरतिव्याप्तिः। कपालतन्तुसंयोगयोरपि कार्यत्वातिरिक्तघटत्वपटत्वावच्छिन्नं प्रति कारणत्वादसाधारणकारणत्वमस्त्येव। अतस्तत्र अतिव्याप्तिवारणाय व्यापारवत्त्वे सतीति करणलक्षणे विशेषणं देयमेव। व्यापारवत्त्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वम्। भवति हि दण्डजन्यत्वे सति दण्डजन्यघटजनकता भ्रमणात्मकव्यापारस्य। एवं कपालसंयोगतन्तुसंयोगादेरपि कपालतन्त्वादिव्यापारत्वं कपालतन्त्वादिजन्यत्वे सति कपालतन्त्वादिजन्यघटपटादिजनकत्वात्। करणलक्षणेऽसाधारणत्वानुपादाने ईश्वरादृष्टादेरपि व्यापारवत्त्वात्करणत्वं स्यादतस्तत्रातिव्याप्तिवारणाया**साधारणे**ति।

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षम्। तद्द्विविधम्- निर्विकल्पकं सविकल्पकं चेति। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं ब्राह्मणोऽयं, श्यामोऽयं, पाचकोऽयमिति।**

षड्विधेन्द्रियभूतप्रत्यक्षप्रमाणलक्षणमाह- **तत्रे**ति। प्रमाभूतप्रत्यक्षादिषु प्रत्यक्षात्मकं यज्ज्ञानं चाक्षुषादिप्रत्यक्षं तत्प्रति करणं व्यापारवदसाधारणकारणमिन्द्रियं भवति। अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्य लक्षणम्। आद्यसन्निकर्षातिरिक्तचतुर्विधसन्निकर्षाणां समवायरूपत्वेन व्यापारत्वं न संभवतीति

इन्द्रियमनःसंयोगस्यैव बाह्यप्रत्यक्षे जननीये इन्द्रियव्यापारता बोध्या। मानसप्रत्यक्षे ; त्वात्ममनःसंयोगस्यैव सा बोध्या। प्रत्यक्षप्रमाणमुक्त्वा प्रत्यक्षप्रमालक्षणमाह- **इन्द्रियार्थसन्निकर्षे**ति। आदौ लक्षणं जन्यप्रत्यक्षस्यैव लक्ष्यत्वाभिप्रायेण। ईश्वरप्रत्यक्षसाधारणं लक्षणं तु ज्ञानाकरणकम् ज्ञानमिति। ज्ञानं व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानं च। तदेव करणं येषां तानि ज्ञानकरणकानि अनुमित्युपमितिशाब्दानि। तद्भिन्नं इत्यर्थः। प्रत्यक्षेन्द्रियाणामेव करणत्वं, न ज्ञानस्य। तथा च ज्ञानाकरणकज्ञानत्वस्य प्रत्यक्षसामान्य एव विद्यमानत्वाल्लक्षणसंगतिः। प्रत्यक्षं विभजते- **निर्विकल्पकमि**ति। तल्लक्षयति- **निष्प्रकारकमिति**। प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकमित्यर्थः। निर्विकल्पके चतुर्थविषयता स्वीक्रियते। त्रिविधविषयतामध्ये एकापि तत्र नास्ति। अतो विशेष्यताशून्यज्ञानत्वं संसर्गताशून्यज्ञानत्वमित्यपि लक्षणं संभवति। सविकल्पकं लक्षयति- **सप्रकारकमि**ति। विषयताया ज्ञाननिरूपितत्वाज्ज्ञानस्य विषयतानिरूपकत्वेन प्रकारतानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणम्। एवं विशेष्यतानिरूपकज्ञानत्वं संसर्गतानिरूपकज्ञानत्वं इत्यपि लक्षणं संभवति। उदाहरति- **यथेति**। इदन्त्वावच्छिन्नविशेष्यतानिरूपकं डित्थत्वादिप्रकारकं ज्ञानं सविकल्पकमित्यर्थः।

**प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः। घटरूपप्रत्यक्षे संयुक्तसमवायः, चक्षुस्संयुक्त घटे रूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतम्, तत्र रूपत्वस्य समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात्, शब्दस्याकाशगुणत्वात् गुणगुणिनोः समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। भूतलं घटाभाववदित्यत्र चक्षुःसंयुक्तभूतले घटाभावस्य विशेषणत्वात्। एवं सन्निकर्षाजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।**

चाक्षुषादिप्रत्यक्षकारणीभूतसन्निकर्षान्विभजते- **संयोग** इत्यादिना। द्रव्यवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगस्य कारणत्वम्। द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य कारणत्वम्। द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायस्य कारणत्वम्। एवं द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य कारणत्वम्। द्रव्यसमवेतविषयकत्वाचप्रत्यक्षे त्वक्संयुक्तसमवायस्य कारणत्वम्। द्रव्यसमवेतसमवेतोष्णत्वादिजातिप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायस्य कारणत्वम्। एवमात्ममानसे मनःसंयोगस्य कारणत्वम्। आत्मसमवेतसुखादिमानसे मनःसंयुक्तसमवायस्य कारणत्वम्। आत्मसमवेतसमवेतसुखत्वादिमानसे मनःसंयुक्तसमवेतसमवायस्य कारणत्वम्। द्रव्यग्राहकाणीन्द्रियाणि चक्षुस्त्वङ्मनांसि त्रीण्येव। अन्यानि घ्राणरसनश्रवणानि तु गुणादिग्राहकाणि। तत्र रसनघ्राणयो रसगन्धतद्गतजातिग्राहकत्वेन द्वितीयतृतीययोः सन्निकर्षयोरेव रसगन्धादिप्रत्यक्षकारणत्वं वाच्यम्। श्रवणेन्द्रियस्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेन्द्रियेण समं शब्दस्य समवायः सन्निकर्षः। शब्दसमवेतशब्दत्वजातिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुत्वं च बोध्यम्। **अभावप्रत्यक्ष** इति। विशेषणविशेष्यभावो नाम विशेषणतासन्निकर्षः। पञ्चसन्निकर्षेषु मध्ये संयोगस्थाने संयुक्तपदं घटयित्वा समवायस्थाने समवेतपदं घटयित्वा अभावस्थले निर्वाह्यम् तथा हि। द्रव्याधिकरणकाभावप्रत्यक्षे संयुक्तविशेषणता। द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे संयुक्तसमवेतविशेषणता। द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे संयुक्तसमवेतसमवेतविशेषणता च सन्निकर्षः। तत्र घटे पटत्वाभावः संयुक्तविशेषणतया गृह्यते। घटसमवेतघटत्वादौ पृथिवीत्वाभावः संयुक्तसमवेतविशेषणतया गृह्यते। घटसमवेतसमवेतरूपत्वादौ नालत्वाभावश्च संयुक्तसमवेतसमवेतविशेषणतया गृह्यते इति संक्षेपः॥

**इति न्यायबोधिन्यां प्रत्यक्षपरिच्छेदः।**

# अनुमानपरिच्छेदः

**अनुमितिकरणमनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः।**

अनुमानं लक्षयति- **अनुमितिकरणमि**ति। अनुमितौ व्याप्तिज्ञानं करणं, परमर्शो व्यापारः, अनुमितिः फलम्। परामर्शस्य व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यानुमितिजनकत्वात्तजन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वमुपपन्नम्। अनुमितिकरणत्वमनुमानस्य लक्षणम्। अनुमानं व्याप्तिज्ञानम्। एतस्य परामर्शरूपव्यापारद्वारा अनुमितिं प्रत्यसाधारणकारणतयानुमितिकरणत्वमुपपन्नम्। **परामर्शजन्यमि**ति। परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणम्। अत्र ज्ञानत्वमात्रोपादाने प्रत्यक्षादावतिव्याप्तिः, अतस्तद्वारणाय परामर्शजन्यत्वे सतीति विशेषणोपादानम्। परामर्शजन्यत्वमात्रोक्तौ परामर्शध्वंसेऽतिव्याप्तिरतस्तद्वारणाय ज्ञानत्वोपादानम्। अनुमितिलक्षणघटकीभूतपरामर्शलक्षणमाचष्टे- **व्याप्तिविशिष्टेति**। व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः। अत्र विशिष्टपदस्य प्रकारतानिरूपकपरत्वात्पक्षधर्मताया ज्ञानमित्यत्र षष्ठ्या विषयत्वबोधनात्। धर्मतापदस्य संबन्धार्थकत्वात् कर्मधारयसमासेन समस्यमानपदार्थयोः अभेदसंसर्गलाभाच्च व्याप्तिप्रकारकाभिन्नं यत्पक्षसंबन्धविषयकं ज्ञानं तत्परामर्श इति लभ्यते। एवं सति धूमो वह्निव्याप्यः आलोकवान्पर्वत इत्याकारकसमूहालम्बने अप्युक्तपरामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वारणाय पक्षनिष्ठविशेष्यतानिरूपितहेतुनिष्ठप्रकारतानिरूपित-व्याप्तिनिष्ठप्रकारताशालिज्ञानं परामर्श इति निष्कर्षः कर्तव्यः। एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम्। अनुमितिपरामर्शयोर्विशिष्य कार्यकारणभावश्चेत्थम्॥ वह्नित्वावच्छिन्नसंयोगसंबन्धावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताशाल्यनुमितित्वावच्छिन्नं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरूपि-

तपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयः कारणम्। वह्नित्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्न-विशेष्यतायाः धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतायाश्च अभेदाङ्गीकर्तृमते वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नव्याप्तित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्न धूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयः कारणमिति वाच्यम्। स च निर्णयः वह्निव्याप्यधूमवान्पर्वत इत्याकारको बोध्यः।

**यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।**

**यत्र यत्रे**ति। यत्रपदवीप्सा धूमाधिकरणे यावति वह्निमत्त्वलाभाय। यावत्त्वमहिम्ना वह्नेर्धूमव्यापकत्वं लब्धम्। तथा च धूमव्यापकवह्निमतीत्यर्थः। तदेव स्पष्टयति- **साहचर्यनियम** इति। नियतसाहचर्यं व्याप्तिरित्यर्थः। नियतत्वं व्यापकत्वम्। साहचर्यं सामानाधिकरण्यम्। तथा च धूमनियतवह्निसामानाधिकरण्यं व्याप्तिरित्यर्थः। वह्नौ धूमव्यापकत्वं च धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वम्। तथा हि। धूमाधिकरणे चत्वरमहानसादौ वर्तते योऽभावः घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावः न तु वह्नित्वावच्छिन्नप्रतियोगिताकाभावः। कुतः। पर्वतादौ वह्नेः सत्त्वात्। एवं सति धूमाधिकरणे पर्वतादौ वर्तमानस्य घटाद्यभावस्य प्रतियोगितावच्छेदकं घटत्वादिकमनवच्छेदकं वह्नित्वं, तद्वत्त्वं वह्नौ वर्ततेऽतो धूमव्यापकत्वं वह्नौ वर्तते। तथा च धूमव्यापकवह्निसामानाधिकरण्यं व्याप्तिरिति फलितमिति इयमन्वयव्याप्तिः सिद्धान्तानुसारेण। पूर्वपक्षीयव्याप्तिस्तु साध्याभाववदवृत्तित्वम्। साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसंबन्धावन्निनप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यावच्छिन्नाभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावो व्याप्तिरित्यर्थः। तच्च केवलान्वयिन्यव्याप्तमिति सिद्धान्तानुसरणम्।

**अनुमानं द्विविधम्। स्वार्थं परार्थं चेति। स्वार्थं स्वानुमितिहेतुः। तथा हि स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति अनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्। यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान्स सोऽग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते।**

**प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् सोऽग्निमान् यथा महानसम् इत्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्। स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।**

अनुमानं विभजते- **स्वार्थमि**ति। स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानम्। तत्प्रयोज्यानुमानं परार्थानुमानम्। न्यायत्वं च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम्। अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वम्।

**लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निः यथा महानसम् इत्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः।**

अन्वयेनेति। साध्यसामानाधिकरण्यरूपान्वयव्याप्तिमानित्यर्थः। व्यतिरेकेणेति। व्यतिरेको नामाभावः। तथा च साध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरकव्याप्तिः। इयं च व्याप्तिः यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति। यत्र पदवीप्सया वह्न्यभाववति यावति धूमाभावग्रहणे यावत्पदस्य व्यापकत्वपरतया धूमाभावे वह्न्यभावव्यापकत्वं लभ्यते। वह्न्यभावे धूमाभावव्याप्यत्वं च लभ्यत। वह्न्यभावनिष्ठव्याप्यत्वं च स्वाश्रयवह्न्यभावव्यापकीभूताभावप्रतियोगित्वसंबन्धेन धूमनिष्ठतया गृह्यत इति

व्यतिरेकव्याप्तिमत्त्वेनान्वयव्याप्तिमत्त्वेन चान्वयव्यतिरेकित्वेन गीयते। व्यतिरेकपरामर्शाकारश्च वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवानिति।

**अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत् इति। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति। सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्। यदितरेभ्यो न भिद्यते न तद्गन्धवत्। यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति। पृथिवीमात्रस्य पक्षत्वात्।**

केवलान्वयिनो लक्षणमाह- **अन्वयेति**। व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्वं केवलान्वयित्वम्। अथवा केवलान्वयिसाध्यकत्वं तत्। एतच्च लक्षणं हेतोर्व्यतिरेकित्वेऽपि सङ्गच्छते। साध्यस्य केवलान्वयित्वादेव व्यतिरेकव्याप्तेरभावादन्वयमात्रव्याप्तिकं केवलान्वयीति मूलोक्तलक्षणमुपपन्नम्। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। न चैवमाकाशाभावे संयोगाभावे चाव्याप्तिरिति वाच्यम्। स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्यैव तदर्थत्वात्। तथा च तयोः एकजातीयसंबन्धेन सर्वत्र विद्यमानत्वान्नाव्याप्तिः। केवलव्यतिरेकिणो लक्षणमाह- **व्यतिरेके**ति। निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकित्वम्। **यथे**ति। अत्र पृथिवीत्वावच्छिन्नं पक्षः। पृथिवीतरजलादिभेदः साध्यम्। गन्धवत्त्वं हेतुः। अत्र यद्गन्धवत्तदितरेभ्यो भिद्यते यथेत्यन्वयदृष्टान्ताभावाद्गन्धव्यापकेतरभेदसामानाधिकरण्यरूपान्वयव्याप्तिग्रहासंभवः। किं तु यत्र यत्र पृथिवीतरभेदाभावस्तत्र तत्र गन्धाभावो यथा जलादिकमिति व्यतिरेकदृष्टान्ते जलादावितरभेदाभावरूपसाध्याभावव्यापकता गन्धाभावे गृह्यते। इममेवार्थं मनसि निधाय यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलमिति ग्रन्थेन मूलकारो व्यतिरेकव्याप्तिमेव प्रदर्शितवान्। एवंप्रकारेण व्यतिरेकव्याप्तिग्रहानन्तरमितरभेदाभावव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवी इत्याकारकव्यतिरेकपरामर्शात्पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नविधेयताका पृथिवी

इतरभेदवतीयाकारकानुमितिर्जायत इति तत्त्वम्। यथाश्रुतमूलार्थस्तु यज्जलं, इतरेभ्यो न भिद्यत इतरभेदाभाववत्, न तद्गन्धवत् जलमितरभेदाभावव्यापकगन्धाभाववत्। न चेयं तथा। इयं पृथिवी न तथा गन्धाभाववती न, किंतु तदभावगन्धवती। तस्मान्न तथा। तस्मात् गन्धाभावाभाववत्त्वात्, न तथा इतरभेदाभाववती न। किंतु इतरभेदाभावाभाववती इतरभेदवतीति पर्यवसन्न इति।

**सन्दिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान्सपक्षः। यथा तत्रैव महानसम्। निश्चितसाध्याभाववान्विपक्षः। यथा तत्रैव महाह्रदः।**

पक्षलक्षणमाह- **संदिग्धेति**। साध्यप्रकारकसंदेहविशेष्यत्वं पक्षत्वम्। संदेहश्च पर्वतो वह्निमान्न वेत्याकारः। इदं च लक्षणमनुमितेः पूर्वं साध्यसंदेहो नियमेन पक्षे जायत इत्यभिप्रायेण प्राचीनैः कृतम्। गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपि गृहमध्यस्थपुरुषस्य घनगर्जितश्रवणेन गगनं मेघवदित्याकारकगगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकानुमितिदर्शनात्प्राचीनलक्षणं विहाय नवीनैरनुमित्युद्देश्यत्वं पक्षत्वमिति स्थिरीकृतम्। सपक्षलक्षणमाह- **निश्चितसाध्येति**। साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम्। निश्चयश्च महानसं वह्निमानित्याकारकः। विपक्षलक्षणमाह- **निश्चितसाध्याभाववानिति**। साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वम्। निश्चयश्च ह्रदो वह्न्यभाववानित्याकारकः।

**सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः।**

सद्धेतून्निरूप्य हेत्वाभासान्निरूपयति- **सव्यभिचारेति**। हेतुवदाभासन्त इति हेत्वाभासाः दुष्टहेतवः। दोषाश्च व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधाः। एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसंबन्धेन एतद्विशिष्टहेतव इत्यर्थः। यद्विषयकत्वेन ज्ञानस्यानुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं दोषसामान्यलक्षणम्। हेतौ दोषज्ञाने

सत्यनुमितिप्रतबन्धः तत्करणप्रतिबन्धो वा जायते। अतो वादिनिग्रहार्थं वादिनोद्भावितहेतौ दोषोद्भावनार्थं दुष्टनिरूपणमिति भावः।

**सव्यभिचारोऽनैकान्तिकः। स त्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वात्। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्। सर्वसपक्षविपक्षव्यावृत्तो (पक्षमात्रवृत्ति) ऽसाधारणः। यथा शब्दो नित्यः शब्दत्वात्। शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्य: व्यावृत्तं शब्दमात्रवृत्ति। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वम् अनित्यं प्रमेयत्वात्। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति।**

सव्यभिचारं विभज्य दर्शयति- **साधारणेति**। साधारणाद्यन्यतमत्वं सव्यभिचारसामान्यलक्षणम्। साधारणत्वं साध्याभाववद्वृत्तित्वम्। **पर्वतो वह्निमान् प्रमेयत्वादिति**। अत्र प्रमेयत्वरूपहेतौ वह्न्यभाववद्वृत्तित्वरूपव्यभिचारे ज्ञाते वह्न्यभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम्। **असाधारण इति**। सर्वसपक्षव्यावृत्तत्वं साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः। हेतौ साध्यवदवृत्तित्वे निश्चिते साध्यवद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम्। अनुपसंहारिणं लक्षयति- **अन्वयेति**। उभयदृष्टान्ताभावादन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्री नास्तीत्यर्थः। किंचिद्विशेष्यकनिश्चयाविषयसाध्यकत्वे सति कश्चिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वमेव अनुपसंहारित्वम्। एतदीयज्ञानस्य व्याप्तिसंशयजननद्वारा व्याप्तिज्ञानप्रतिबन्धः फलमिति भावः। वस्तुतस्तु अत्यन्ताभावाप्रतियोगिसाध्यादिकमेव अनुपसंहारित्वमिति बोध्यम्।

**साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः (कार्यत्वात्)कृतकत्वात् घटवत्। (कार्यत्वं) कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्। यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद्घटवत्।**

विरुद्धं लक्षयति - **साध्याभावव्याप्त** इति। साध्याभावव्याप्तिः साध्याभावनिरूपितव्यतिरेकव्याप्तिः साध्यव्यापकीभूताभावप्रतियोगित्वम्। तथा च पक्षविशेष्यकसाध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यक साध्यप्रकारकानुमितिप्रतिबन्धः फलम्। एवं सत्प्रतिपक्षेऽपि। विरुद्धसत्प्रतिपक्षयोर्विशेषस्तु हेतोरेकत्वेन हेतोर्द्वित्वेन च ज्ञातव्यः। साध्याभावव्याप्यप्रतिहेतुमत्पक्षस्सत्प्रतिपक्ष इति यावत्। विरुद्धे साध्याभावसाधको हेतुः साध्यसाधकत्वेनोपन्यस्त इत्यसामर्थ्यसूचनमपि।

**असिद्धस्त्रिविधः। आश्रयासिद्ध, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव। स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधानाव्यापकत्वम्। पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोग उपाधिः। यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम्। यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावात् इति साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।**

**आश्रयासिद्ध** इति। पक्षे पक्षतावच्छेदकविरहः आश्रयासिद्धिः। **यथेति**। अत्रारविन्दे गगनीयत्वाभावे निश्चिते गगनीयत्वविशिष्टारविन्दे सौरभ्यानुमितिप्रतिबन्धः फलम्। **स्वरूपासिद्ध** इति। स्वरूपासिद्धिर्नाम पक्षे हेत्वभावः। तथा च हेत्वभावविशिष्टपक्षज्ञानात्पक्षविशेष्यकहेतुप्रकारकपरामर्शप्रतिबन्धः फलम्। व्याप्यत्वासिद्ध इति। प्रकृते धूमव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद्धूमे आर्द्रेन्धनसंयोगव्याप्यत्वं गृह्यते। एवं वह्नेरव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद्वह्नौ तदव्याप्यत्वं गृह्यते। तदेव व्यभिचरितत्वम्। तथा

चोपाधिव्यभिचरितत्वं साधने गृहीतं चेदुपाधिभूतार्द्रेन्धनसंयोगव्याप्यधूमव्यभिचरितत्वं गृह्यत एव। अनुमानप्रकारश्च पूर्वानुमाने हेतुं पक्षीकृत्य वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचरितत्वात् घटत्वादिवत् यो यत्साध्यव्यापकव्यभिचारी स सर्वोऽपि साध्यव्यभिचारीति रीत्या बोध्यः। एवं प्रकारेण प्रकृतानुमानहेतुभूतपक्षे साध्यव्यभिचारोत्थापकतया दूषकत्वमुपाधेः फलम्। तथा च धूमाभाववदवृत्तित्वाभावरूपधूमव्यभिचारे गृहीते वह्नौ धूमाभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम्। नच व्याप्यत्वासिद्धेः व्यभिचाराभेद इति वाच्यम्। धूमाभाववद्वृत्तित्वाभावाभावत्वेन व्याप्यत्वासिद्धित्वं, धूमाभाववद्वृत्तित्वत्वेन व्यभिचारत्वमिति भेदात्।

**यस्य साध्याभावः प्रमाणान्तरेण निश्चित: स बाधितः। यथा वह्निरनुष्ण: पदार्थत्वात् जलवदिति। अत्रानुष्णत्वं साध्यम्। तदभाव उष्णात्वं त्वाचप्रत्यक्षेण गृह्यत इति बोध्यम्।**

**यस्ये**ति। यस्य हेतोः साध्याभावः साध्यबाधः प्रमाणान्तरेण प्रत्यक्षप्रमाणेन पक्षे निर्णीतः स बाधित इत्यर्थः। तथा च प्रात्यक्षिकसाध्यबाधनिश्चये जाते साध्यानुमितिप्रतिबन्धः फलम्। बाधितसाध्यकत्वाद्बाधितहतुरित्युच्यते॥

इति न्यायबोधिन्यामनुमानपरिच्छेदः समाप्तः॥

## विषयसारः

न्यायबोधिन्यां प्राधान्येन ये विषयाः चर्चिताः तस्मात् कतिपयविषयाः संगृह्यन्ते।

### शक्तेरतिरिक्तपदार्थत्वखण्डनम्

तर्कसंग्रहे "द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः 'सप्त पदार्थाः" इत्युक्तम्। अत्र विभागादेव सप्तत्वे सिद्धे किमर्थम् सप्तग्रहणम्? इति चेत् "पदार्थत्वम् द्रव्यादिसप्तान्यतमत्वव्याप्यम्" इति

व्याप्तिलाभार्थम्। विभागो नाम पदार्थत्वव्याप्यधर्मपुरस्कारेण धर्मिप्रतिपादनम्। पदार्थत्वव्याप्याः धर्माः द्रव्यत्वादयः, तत्पुरस्कारेण द्रव्यादिः प्रतिपादितः इति समन्वय:। अतः विभागात् सप्तत्वे सिद्धेऽपि व्याप्तिः विभागात् न सिद्धा इत्यतः व्याप्तिलाभार्थमेव सप्तग्रहणं कृतम् इति तस्य सार्थक्यम्।

**अत्र पूर्वपक्षः -**

ननु कथम् एते एव पदार्थाः? शक्तेः अतिरिक्तस्य सत्वात् सप्त पदार्थाः इत्युक्तिः असंगता। शक्तिसत्वे किम् प्रमाणम् ? इत्युक्ते प्रतिबन्धकत्वान्यथानुपपत्त्या शक्तिः सिध्यति। तथा हि- दाहं प्रति वह्नित्वेन कारणत्वं न सम्भवति। मणिसंयोगे सति वह्निसत्वेऽपि दाहो न जायते, मणिसंयोगशून्येन तु दाहो जायते, तथा च वह्नेः वह्नित्वेन कारणत्वं न सम्भवति, किन्तु शक्तिमत्त्वेनैव कारणत्वम्। तथा च कार्यानुकूलधर्मः शक्तिः इति ज्ञातम्। एवम् मणेः दाहप्रतिबन्धकत्वम् वक्तव्यम्। प्रतिबन्धकत्वं कार्यानुकूलधर्मविघटकत्वम्। तथा च प्रतिबन्धकत्वान्यथानुपपत्या वह्नौ दाहानुकूलधर्मवत्वं विना मणेः प्रतिबन्धकत्वं अनुपपन्नम् इति शक्तिः सिध्यति। तथा च मणिसमवधाने सति वह्नौ दाहानुकूला शक्तिः नश्यति। मण्यभावदशायां दाहानुकूला शक्तिः उत्पद्यते। एवम् कार्यसामान्यं प्रति शक्तिमत्वेन अनुगतकार्यकारणभावः सम्भवति। तस्मात् शक्तिः अतिरिक्त पदार्थः इति पूर्वपक्षः।

**समाधानम्-**

सामान्यतः कारणसामग्रीसत्वेऽपि प्रतिबन्धके सति कार्यं नोत्पद्यते इत्यतः "कार्यसामान्यं प्रति प्रतिबन्धकाभावस्य कारणत्वम् क्लृप्तम् अस्ति। तथा च मणेः प्रतिबन्धकत्वात् मण्यभावस्य प्रतिबन्धकाभावविधया कारणत्वम् सम्भवत्येव। मणिसत्त्वदशायाम् तदभावरूपकारणान्तराभावादेव न दाहोत्पत्तिः, मण्यभावदशायाम् मण्यभावरूपकारणस्य सत्त्वात् दाहोत्पत्तिः इत्येतावतैव निर्वाहे शक्तेः अतिरिक्तपदार्थत्वं न युक्तम्। एवम् मणिसमवधाने शक्तेः ध्वंसः, मण्यसमवधाने शक्तेः उत्पत्तिः इत्येवं क्रमेण अनन्तशक्तितत्प्रागभावध्वंसकल्पने गौरवम् भवति। एवम् प्रतिबन्धकत्वं न कार्यानुकूलधर्मविघटकत्वम्, किन्तु कारणीभूताभावप्रतियोगित्वम्। अत्र कारणीभूताभावः = मण्यभावः

तत्प्रतियोगित्वम् - मणौ वर्तते इति तस्य प्रतिबन्धकत्वम्, तदभावस्य कारणत्वम्। तस्मात् सप्तैव पदार्थाः इति सिद्धम्।

**तमोवादः**

अत्र मूले "तत्र द्रव्याणि नवैव" इत्युक्तम्। अत्र पूर्वपक्षः अन्धकारस्य दशमद्रव्यस्य विद्यमानत्वात् कथं नवैव द्रव्याणि इति वक्तुं शक्यते? "तमः चलति, नीलं तमः" इत्यादिप्रत्ययाः तमसः सत्वे प्रमाणम्। तमसो द्रव्यत्वे अनुमानं प्रमाणम् भवति। तमः द्रव्यम् नीलरूपाश्रयत्वात् घटवत्" इति। अत्र पक्षः = तमः, साध्यम् = द्रव्यत्वम्, हेतुः = नीलरूपाश्रयत्वम्, दृष्टान्तः घटः = घटे नीलरूपाश्रयत्वं वर्तते एवम् द्रव्यत्वं च वर्तते इति दृष्टान्ते समन्वयः। तमसि नीलरुपाश्रयत्वम् अस्ति अतः द्रव्यत्वं सिध्यति।

अत्र प्रश्नः = तमसः द्रव्यत्वेऽपि तस्य क्लृप्तद्रव्येषु अन्तर्भावात् कथम् अतिरिक्तद्रव्यत्वम् इति। समाधानम् = तमः क्लृप्तद्रव्येषु नान्तर्भवति। तत्रापि तमः वाय्वादिषट्सु "वायुगगनकालदिगात्ममनसु" नान्तर्भवति, रूपवत्वात्। अनुमानप्रयोगः = "तमः वाय्वादिभिन्नम् रूपवत्वात् घटवत्" इति। अत्र पक्षः = तमः, साध्यम् = वाय्वादिषड्भेदकूटम्, हेतुः = रूपवत्त्वम्, दृष्टान्तः = घटः। घटे रूपवत्वम् अस्ति, एवम् वाय्वादिभेदकूटमपि अस्ति इत्ययं सद्धेतुः। तमसि रूपवत्वात् वाय्वादिभिन्नत्वम् सिध्यति। अतः तमः वाय्वादिषट्सु नान्तर्भवति। एवं "तमः पृथिव्यां नान्तर्भवति गन्धशून्यत्वात् आकाशवत्" इति अनुमानम्। अत्रापि पक्षः = तमः, साध्यम् = पृथिवीभिन्नत्वम्, हेतुः = गन्धशून्यत्वम्, दृष्टान्तः = आकाशः। आकाशे गन्धशून्यत्वम् अस्ति, एवम् पृथिवीभिन्नत्वमप्यस्ति इति अयं सद्धेतुः, तमसि गन्धशून्यत्वमस्तीति पृथिवीभिन्नत्वम् सिध्यति। तस्मात् तमः पृथिव्यामपि नान्तर्भवति, एवम् "तमः जलतेजसोः नान्तर्भवति स्पर्शशून्यत्वात् आकाशवत्"। अत्र तमः = पक्षः, साध्यम् = जलतेजोभिन्नत्वम्, हेतुः = स्पर्शशून्यत्वम्, दृष्टान्तः = आकाशम्। आकाशे स्पर्शशून्यत्वमस्ति, एवम् जलतेजोभेदोपि अस्तीति अयं सद्धेतुः। तमसि स्पर्शशून्यत्वमस्तीति जलतेजोभेदः सिध्यति। तथा क्लृप्तद्रव्येषु अनन्तर्भूतत्वात् द्रव्यत्वाच्च तमसः अतिरिक्तद्रव्यत्वं सिध्यति। तथा च तमसः दशमद्रव्यस्य सत्त्वात् "नवैव द्रव्याणि" इत्युक्तिः अयुक्ता इति **पूर्वपक्षः**।

**समाधानम्-**

तमः तेजोऽभावरूपमेव। तमसः तेजोऽभावरूपत्वेनैवेपपत्तौ अतिरिक्तद्रव्यकल्पने मानाभावः, गौरवं च। अत्र प्रश्नः - कथं तेजोऽभावः एव तमः? तमोऽभावः एव तेजः इत्युच्यताम्, तेजोऽभावस्यैव तमस्त्वे किम् विनिगमकम् इति प्रश्नः। समाधानम् = तेजसः तमोऽभावस्वरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयत्वेन द्रव्यान्तरकल्पने गौरवम्। तथा च उष्णस्पर्शरूपगुणाश्रयत्वेन तेजसः एव द्रव्यत्वं सिध्यति। तेजसः अभावरूपत्वे उष्णस्पर्शाश्रयद्रव्यन्तरकल्पने गौरवम् इति विनिगमकसत्वात् तेजोऽभावः एव तमः इति सिध्यति।

अस्तु तमसः तेजोऽभावरूपत्वे "नीलं तमश्चलति" इत्यादिप्रतीतिः कथं? अभावे रूपकर्मणोः अभावात् ? इति प्रश्नः। समाधानम् = रूपवत्ताप्रतीतिः भ्रान्तिरेव। एवम् कर्मवत्ताप्रतीतिरपि दीपापसरणौपाधिकी भ्रान्तिरेव। वस्तुतः दीपे एव क्रिया अस्ति, दीपापसरणे तमसि क्रिया अस्तीति प्रतीयते, किन्तु सा क्रिया दीपसमवेता एव, न तु तमस्समवेता, तस्मात् कर्मवत्ताप्रतीतिरपि भान्तिरेव। तस्मात् तमसः तेजोऽभावरूपत्वात् "नवैव द्रव्याणि" इति सिद्धम्।

**वायुलक्षणं अतिव्याप्त्यादिनिरूपणम् च -**

"रूपरहितस्पर्शवान् वायुः" इत्यस्ति। इदं लक्षणवाक्यम्। "रूपरहितत्वे सति स्पर्शवत्वम्" इति लक्षणम्। सति सप्तम्याः विशिष्टार्थकत्वात् "रुपरहितत्वविशिष्टस्पर्शवत्वम्" वायौ लक्षणम्। वायौ रूपं नास्ति, रुपरहितत्वम् अस्ति, एवम् स्पर्शवत्त्वमप्यस्तीति लक्षणसमन्वयः। अत्र लक्षणे रूपरहितत्वं विशेषणम् स्पर्शवत्वम् विशेष्यम्। रूपरहितत्वमात्रोक्तौ आकाशादौ अपि रूपं नास्तीति, रूपरहितत्वस्य सत्वात् आकाशादौ अतिव्याप्तिः। तदारणाय "स्पर्शवत्वम्" इति विशेष्योपादानम्। आकाशादौ स्वपर्शवत्वं नास्तीति अतिव्याप्तिः वार्यते। स्पर्शवत्वमात्रोक्तौ पृथिव्यादावपि स्पर्शवत्वस्य सत्त्वात् पृथिव्यादावतिव्याप्तिः। तद्वारणाय "रूपरहितत्वम्" इति विशेषणोपादानम्। पृथिव्यादौ रूपस्य विद्यमानत्वात् रूपरहितत्वाभावात् अतिव्यापिर्वार्यते।

"अतिव्याप्तिः, अव्याप्तिः, असम्भवः" इति लक्षणस्य त्रीणि दूषणानि। अत्र **अतिव्याप्तिर्नाम** "अलक्ष्ये लक्षणसत्त्वम्"। यथा गोः शृङ्गित्वम् लक्षणम् उच्यते चेत् शृङ्गित्वरूपलक्षणम् अतिव्याप्तिग्रस्तं भवति। अत्र गवां लक्षणं उच्यते इत्यतः गौः लक्ष्या भवति। अलक्ष्ये = गोभिन्ने, महिषादावपि शृङ्गित्वरूपलक्षणस्य सत्त्वात् शृङ्गित्वम् अतिव्याप्तम्। अव्याप्तिर्नाम लक्ष्यैकदेशावृत्तित्वम्। यथा गोः नीलरूपवत्वम् लक्षणम् उच्यते चेत् तत् अव्याप्तम्। अत्र गोलक्षणस्य सर्वाः गावः लक्ष्याः भवन्त्येव। तथा च नीलरूपवत्त्वरूपलक्षणम् यद्यपि नीलगवि अस्ति, तथापि श्वेतगवि नीलरूपतत्वं नास्तीति, लक्ष्यैकदेशे - श्वेतगवि, लक्षणस्य अवृत्तित्वात् नीलरूपवत्त्वम् अव्याप्तम्। असम्भवो नाम "लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वम्" यथा गोः "एक शफवत्त्वम्" लक्षणम् उच्यते चेत् तत् असम्भवग्रस्तम्। यथा गोसामान्यस्य द्विशफवत्त्वमेव विद्यते, एकशफवत्वम् गोसामान्ये नास्तीति, लक्ष्यमात्रे गोसामान्ये, लसणस्य एकशफवत्वस्य असत्वात् एकशफवत्त्वं असम्भवि।

इदानीं अतिव्याप्त्यव्याप्त्यसम्भावानां निष्कृष्टलक्षणानि निरूप्यन्ते। लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम्" अतिव्याप्तेः लक्षणम्। अस्य लक्षणस्य अतिव्याप्तिग्रस्ते शृङ्गिते समन्वयम् = लक्ष्या- गौः, लक्ष्यता = गोनिष्ठा, लक्ष्यतावच्छेदकम् गोत्वम्, तदधिकरणम् = गौः, तद्वृत्तित्वम् = शृङ्गित्वे अस्तीति लक्ष्यतावच्छेदकसामानधिकरणम्, एवम् लक्ष्या = गौः, लक्ष्यता = गोनिष्ठा, लक्ष्यतावच्छेदकम् = गोत्वम्, तदवच्छिन्ना प्रतियोगिता = गोत्ववच्छिन्ना प्रतियोगिता, तन्निरूपको भेदः "गौर्न" इति प्रतीतिसिद्धः गोभेदः, तदधिकरणम् महिषादि, तद्वृत्तित्वम् शृङ्गित्वे अस्तीति लक्षणसमन्वयः। सामानाधिकरण्यम् नाम "तदधिकरणवृत्तित्वम्" इत्यर्थः। इति अतिव्याप्तिः।

**अव्याप्तिस्तु-** "लक्ष्यतावच्छेदकसमानाधिकरण्ये सति लक्ष्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वम्"। अस्य लक्षणस्य अव्याप्तिग्रस्ते नीलरूपवत्वे समन्वयः = लक्ष्या = गोः, लक्ष्यतावच्छेदकम् गोत्वम्, तदधिकरणम् = नीलगौः, तद्वृत्तित्वम् = नीलरूपवत्ते अस्तीति प्रथमदलम्, एवम् = लक्ष्या गौः, लक्ष्यता = गोनिष्ठा, लक्ष्यतावच्छेदकं = गोत्वम्,

तदधिकरणम् = श्वेतगौरपि, तद्वृत्तिः अभावः = "श्वेतगवि नीलरूपवत्त्वं नास्ति" इति प्रतीतिसिद्धः नीलरूपवत्त्वाभावः, श्वेतगवि नीलरूपस्य असत्वात्, तादृशाभावस्य प्रतियोगि- नीलारूपवत्वं, प्रतियोगित्वम् नीलरूपवत्वे अस्तीति लक्षणसमन्वयः।

**असम्भवस्तु** "लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम्" व्यापकत्वं तु "तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम्" तथा च "लक्ष्यतावच्छेदक-अधिकरणवृत्त्यत्यन्ताभावाप्रतियोगीभूताभावाप्रतियोगित्वम्" इति लक्षणम् लब्धम्। यत्र यत्र लक्ष्यतावच्छेदकम् तत्र सर्वत्र लक्षणाभावः, इति तात्पर्यम्। अस्य लक्षणस्य असम्भवग्रस्ते एकशफवत्त्वे समन्वयः = लक्ष्या = गौः, लक्ष्यता = गीनिष्ठा, लक्ष्यतावच्छेदकं = गोत्वम्, तदधिकरणम् गौः, तद्वृत्तिः अत्यन्ताभावः = गवि "एकशकवत्त्वाभावो नास्ति "इति प्रतीतिसिद्धः नहि एकशफवत्त्वाभावाभावः, गवि एकशफवत्त्वाभावस्यैव सत्वात्, किन्तु "घटो नास्तीति" प्रतीतिसिद्धः घटाभावः, तत्प्रतियोगी घटः, अप्रतियोगी = एकशफवत्वाभावः, तथा च लक्ष्यतावच्छेदकव्यापकीभूतः अभावः = एकशफवत्वाभावः, तत्प्रतियोगित्वम् एकशफवत्वे अस्तीति लक्षणसमन्वयः।

**रूपलक्षणम्**

मूले "चक्षुमात्रग्राह्यो गुणो रूपम्" इत्यस्ति। तथा च रूपलक्षणम् "चक्षुमात्रग्राह्यत्वविशिष्टगुणत्वम्" रुपलक्षणम्। रूपे चक्षुमात्रग्राह्यत्वम् अस्ति, एवम् गुणवत्वम् अप्यस्तीति लक्षणसमन्वयः। गुणत्वमात्रोक्तौ रसे अतिव्याप्तिः, तद्वारणाय विशेषणोपादानम्, रसस्य चक्षुर्ग्राह्यत्वं नास्तीति अतिव्याप्तिः वार्यते। चक्षुर्मात्रग्राह्यत्वमात्रोपादाने रूपत्वे अतिव्याप्तिः। तथा हि। "यो गुणो यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तेनेन्द्रियेण गृह्यते" इति न्यायः। तथा च रुपम् चक्षुर्ग्राह्यत्वम् इति कृत्वा रूपनिष्ठरूपत्वजातिरपि चक्षुर्ग्राह्या एवेति कृत्वा रूपत्वे अतिव्याप्तिः, तद्वारणाय गुणत्वदलम्। रूपत्वजातौ गुणत्वम् नास्तीति अतिव्यातिः वार्यते। अत्र "चक्षुर्मात्रग्राह्यत्वम्" नाम "चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति चतुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वम्" इत्यर्थः। तथा च रूपत्वे अतिव्याप्तिवारणाय गुणत्वोपादानम् इति पूर्वम् उक्तम्। अत्र "चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे

सति गुणत्वमात्रोपादाने" मात्रपदानुपादाने संख्यादिसामान्यगुणे अतिव्याप्तिः। संख्यायामपि चक्षुरिन्द्रियजन्य "इदमेकम् इत्याकारकप्रत्यक्षविषयत्वमस्ति, एवं गुणत्वमप्यस्तीति अतिव्याप्तिः। तद्वारणाय चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति दलम्। संख्यायाम् चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वमेवास्ति, त्वचापि संख्या गृह्यते एव। तस्मात् चक्षुरितरग्राह्यत्वमेवास्ति, तदभावः नास्तीति अतिव्याप्तिः वार्यते।

एवम् "चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वम्" इत्येतावन्मात्रोक्तौ "चक्षुर्ग्राह्यत्वानिवेशे" गुरुत्वादौ अतिव्याप्तिः, गुरुत्वस्य अतीन्द्रियत्वेन इन्द्रियग्राह्यत्वमेव नास्तीति सुतरां चक्षुभिन्नेन्द्रियग्राह्यत्वं नास्ति, एवम् गुणत्वमप्यस्तीति अतीन्द्रियगुणे गुरुत्वादौ अतिव्याप्तिः। तद्वारणाय "चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वम्" इति दलं निवेशनीयमेव। गुरुत्वादौ चक्षुरिन्द्रियग्राह्यत्वम् नास्तीत्यतिव्याप्तिः वार्यते।

तथा च चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वम्" रूपस्य लक्षणम् भवति।

अत्र पुनरतिव्याप्तिशङ्का = प्रभाघटसंयोगे निरुक्तलक्षणस्य अतिव्यातिः। प्रभायाः त्वग्ग्राह्यत्वं नास्ति। चक्षुर्मात्रग्राह्यो भवति, तथा च प्रभाघटसंयोगे चक्षुर्ग्राह्यत्वम् अस्ति, चक्षुर्भिन्नेन्द्रियाग्राह्यत्वम् अस्ति, एवम् गुणत्वमप्यस्तीति रूपलक्षणस्य प्रभाघटसंयोगे अतिव्याप्तिः इति शंका।

समाधानम्- लक्षणघटकगुणपदं विशेषगुणपरम् विक्षितम्। तथा च संयोगस्य विशेषगुणत्वाभावेन अतिव्याप्तिः वार्यते।

पुनः प्रश्नः। गुणपदस्य विशेषगुणपरत्वे मात्रपदवैयर्थ्यम् स्यात्। तथाहि संख्यादौ अतिव्याप्तिवारणाय मात्रपदम् निवेशितम् इत्युक्तम्। किन्तु संख्यादीनामपि विशेषगुणत्वाभावेन विशेषगुणत्वदलेनैव संख्यादीनां वारणात् मात्रपदवैयर्थ्यम् इति प्रश्नः।

समाधानम् तु विशेषगुणत्वघटितलक्षणेऽपि मात्रपदम् आवश्यकम्। अन्यथा सांसिद्धिकद्रवत्वे अतिव्याप्तिः। सांसिद्धिकद्रवत्वे चक्षुर्ग्राह्यत्वमस्ति, एवं विशेषगुणत्वमप्यस्तीति अतिव्याप्तिः। तद्वारणाय "मात्रपदम् निवेशनीयमेव। सांसिद्धिकद्रवत्वे चक्षुर्भिन्नत्वग्ग्राह्यत्वम् एवास्ति, चक्षुरितराग्राह्यत्वं नास्तीति अतिव्याप्तिः वार्यते। तथा च "चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति विशेषगुणत्वम्" रूपस्य लक्षणं भवति।

**अथवाकल्पः निरूप्यते**। विशेषगुणत्वमिति मास्तु, किन्तु गुणत्वमेव लक्षणघटकम् किन्तु जातिघटितत्वेन परिष्क्रियते। "चक्षुर्मात्रग्राह्यजातिमत्त्वे सति गुणत्वम्' चक्षुरिन्द्रियग्राह्या चक्षुर्भिन्नेन्द्रियाग्राह्या या जातिः तद्वत्त्वे सति गुणत्वम् इति तदर्थं। तथा च चक्षुर्मात्रग्राह्या जातिः रूपत्वमेव भवति, संयोगत्वम् न भवति, संयोगस्य त्वग्ग्राह्यत्वमप्यस्तीति "यो गुणो यदिन्द्रियग्राह्यः तन्निष्ठा जातिरपि तेनैव गृह्यते" इति न्यायानुसारेणे संयोगवृत्तिसंयोगत्वजातेः त्वग्ग्राह्यत्वमप्यस्तीति चक्षुर्मात्रग्राह्या जातिः इत्यनेन संयोगत्वं स्वीकर्तुं न शक्यते, तथा च तद्वति प्रभाघटसंयोगे अतिव्याप्तिः न भवति। अस्मिन् पक्षे जातौ चक्षुरितराग्राह्यत्वानुपादाने संयोगत्वजातिमादाय संयोगे अतिव्याप्तिः। तद्वारणाय मात्रपदम्। संयोगत्वे चक्षुर्भिन्नत्वग्ग्राह्यत्वमस्तीति नातिव्याप्तिः। एवं जातौ चक्षुर्ग्राह्यत्वानुपादाने = चक्षुर्ग्राह्या या जातिः इत्यनेन गुरुत्वत्वजातिमादाय गुरुत्वे अतिव्याप्तिः। तद्वारणाय चक्षुर्ग्राह्यत्वं विशेषणम्। गुरुत्वत्वे चक्षुर्ग्राह्यत्वं नास्तीति न तमादायतिव्याप्तिः। एवं गुणत्वानुपादाने सुवर्णत्वस्यापि चक्षुर्मात्रग्राह्यत्वात् सुवर्णत्वमादाय सुवर्णे अतिव्याप्तिः। तद्वारणाय गुणत्वदलं सुवर्णे गुणत्वं नास्तीति अतिव्याप्तिर्वार्यते। तथा च "चक्षुरिन्द्रियजन्यप्रत्यक्षविषयचक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयजातिमत्त्वे सति गुणत्वम्" रूपस्य लक्षणम्।

**पाकप्रक्रिया –**

पाको नाम विजातीयतेजस्संयोगः। तेन पूर्वरूपरसगन्धस्पर्शाः नश्यन्ति। रूपान्तररसान्तरगन्धान्तरस्पर्शान्तराणि उत्पद्यन्ते। तत्रापि रूपजनकतेजस्संयोगः अन्यः। रसादिजनकतेजस्संयोगः अन्यः। रूपनाशपूर्वकरूपान्तरोत्पत्तिजनकतेजस्संयोगापेक्षया

रसनाशपूर्वकरसान्तरोत्पादकतेजस्संयोगः विजातीयो भवति, तदपेक्षया गन्धनाशपूर्वकगन्धान्तरोत्पत्तिजनकतेजस्संयोगः अन्यः, एवं तदपेक्षये च स्पर्शपरावृत्तिजनकतेजस्संयोगोऽपि विजातीय एवेति। एवं रीत्या भिन्नभिन्नजातीयाः पाकाः रूपादिकार्यवैलक्षण्येन कल्प्यन्ते।

**अत्र प्रश्नः** – किमर्थम् एवं कल्पनीयम्? विभिन्नत्वेन नानाजातिकल्पने गौरवात् लाघवेन एकेनैव तेजस्संयोगेन रूपरसगन्धस्पर्शानां नाशः, पुनः उत्पत्तिश्च इत्येव उच्यताम् इति प्रश्नः।

**समाधानम्**- एवम् अनुभवो नास्ति। तथा च नाशकतेजस्संयोगो अन्यः, उत्पादकतेजरससंयोगः अन्य एव । एकम् तद्गुणपरावर्तकतेजस्संयोगः अन्यः एवेति। तत्र प्रमाणम् आम्रफलं तृणपुञ्चे निक्षिप्तं चेत् आम्रे उष्णात्मकतेजस्संयोगो भवति, तत्र पाकवशात् पुर्ववृत्तिरूपनाशः जायते, एवं रूपान्तरपीतरुपोत्पत्तिरेव दृश्यते, पुर्वरसस्य नाशः न जायते। रुपान्तरोत्पत्तावपि पूर्वरसस्य आम्लस्यैव अनुभवो वर्तते। इति रूपजनकविजातीयतेजस्संयोगस्य उदाहरणम्। एवं क्वचित् विजातीयतेजस्संयोगेन पूर्वरूपहरितस्य नाशो न जायते। किन्तु तद्गतपुर्वरसस्य आलस्य नाशः, तदनन्तरं मधुरस्य उत्पत्तिः ज्ञायते। विजातीयतेजस्संयोगेन मधुररसस्य अनुभवः जायते। इति अत्र रसपरावृत्तिः जायते। तस्मात् रसजनकतेजस्संयोगः अन्य एवेति सिद्धम्।

एवम् गन्धजनकतेजस्संयोगोऽपि विलक्षणः। क्वचित् तृणपुञ्जनिक्षिप्ते आम्रे रूपरसयोः परावृत्तिः न दृश्यते। किन्तु गन्धपरावृत्तिरेव दृश्यते। तत्र विजातीयपाकवशात् पूर्वगन्धस्य नाशेन पुनः गन्धान्तरोत्पादात् गन्धजनकतेजस्संयोगः रूपरसजनकतेजस्संयोगात् विलक्षणः भवति। एवम् स्पर्शजनकतेजस्संयोगोऽपि पूर्वोक्तत्रयाणाम् अपेक्षया विजातीयः। क्वचित् पूर्वरूपरसगन्धानां परावृतिः न दृश्यते। किन्तु पाकवशान् पूर्वकठिनस्पर्शस्य नाशः, एवम् स्पर्शान्तरस्य मृदुस्पर्शस्य उत्पत्तिः। तस्मात् रूपादिजनकाः विजातीयाः एव पाकाः यथाकार्यम् कल्पनीयाः। किन्तु पृथिव्याम् एव पाकः। जलादौ पाको नास्ति।

पार्थिवपरमाणूनां एकजातिपृथिवीत्वावच्छिन्नत्वेऽपि पाकमहिम्ना पृथिवीत्वव्याप्यविभिन्नदुग्धत्वदधित्वादिजातिविशिष्टानि द्रव्याणि उत्पद्यन्ते। यथा तृणादिः गता भुक्तश्चेत् तेषां आपरमाण्वन्तरभङ्गः। तृणारम्भकेषु नित्येषु परमाणुषु विजातीयतेजस्संयोगात् रूपादिचतुष्टयनाशः। तदनन्तरं दुग्धे यादृशा रूपरसगन्धस्पर्शाः वर्तन्ते, तादृशरूपरसगन्धस्पर्शजनकाः विजातीयाः तेज्जस्संयोगाः जायन्ते। तदनन्तरं तत्तत्पाकवशात् तादृशाः रूपान्तरादयः उत्पद्यते, ततः रूपान्तरादिविशिष्टपरमाणुभिः दुग्धद्व्यणुकम् आरम्भते, ततः दुग्धत्र्यणुकम् इति क्रमेण महादुग्धोत्पत्तिः। एवम् तत्रापि पाकवशात् आपरमाण्वन्तरभङ्गे सति पूर्वरूपादिनाशे दुग्धारम्भकपरमाणुभिरेव नवनीतम् उत्पद्यते, पुनरपि नवनीतारम्भकपरमाणुभिः घृतमारभ्यते इति पार्थिवपरमाणूनां पृथिवीत्वावच्छिन्नत्वेऽपि पाकमहिम्ना पृथिवीत्वव्याप्यदधित्वदुग्धत्वाद्यवच्छिन्नानि द्रव्याणि उत्पद्यन्ते।

**यथार्थानुभवलक्षणम्**

मूले "तद्वति तत्प्रकारकोऽनुभवो यथार्थः" इत्यस्ति। "तद्वति" इत्यत्र सप्तम्यर्थः विशेष्यत्वम्, तस्य च निरूपकतासम्बन्धेन अनुभवे अन्वयः। तत् प्रकारः यस्मिन् इति व्युत्पत्या तत्प्रकारतानिरूपकत्वम् इत्यर्थो लभ्यते। तथा च "तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति अनुभवत्वम्" यथार्थानुभवस्य लक्षणम्। अस्य लक्षणस्य रजते "इदं रदतम्" इत्याकारकप्रमायां समन्वयः। तच्छब्देन प्रकारीभूतधर्मो धर्तव्यः। अस्मिन् ज्ञाने रजतम् विशेष्यम्, रजतत्वम् प्रकारः, तत् रजत्वम्, तद्वान् रजतत्ववत् रजतम्, तन्निष्ठविशेष्यता, तन्निरूपकत्वम् अस्ति, एवं-तत्-रजतत्वम्, तन्निष्ठा प्रकारता, तन्निरूपकत्वम् अस्ति, एवम् अनुभवत्वमप्यस्तीति समन्वयः। अत्र अनुभवत्वानिवेशे "तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वमात्रोक्तौ" "इदं रजतम्" इत्याकारकयथार्थस्मृतौ अतिव्याप्तिः। तद्वारणाय "अनुभवत्वम्" दलम्। स्मृतौ अनुभवत्वम् नास्तीति अतिव्याप्तिः वार्यते। "तत्प्रकारकत्वे सति अनुभवत्वमात्रोक्तौ तद्वद्विशेष्यकत्वानिवेशे शुक्तौ इदं रजतम् इत्याकारकभ्रमे अतिव्याप्तिः । भ्रमेऽपि रजतत्वमेव प्रकार। तथा च रजतत्वप्रकारकत्वे सति अनुभवत्वम् अस्तीति भ्रमे अतिव्याप्तिः। तत् वारणाय "तद्वद्विशेष्यकत्वम् इति

दलम्। तत् पदेन रजतत्वम्, तद्वत् रजतमेव, तद्विशेष्यकत्वम् भ्रमे नास्ति, अत्र शुक्तिरेव विशेष्यम्, तथा रजतत्ववद्रजतविशेष्यतानिरूपकत्वं नास्तीति अतिव्याप्तिर्वार्यते।

एवम् तत्प्रकारकत्वानिवेशे "तद्वद्विशेष्यकत्वे सति अनुभवत्वमात्रोक्तौ शुक्तौ इदं रजतम् इति भ्रमे अतिव्याप्तिः। तत्पदेन शुक्तित्वं स्वीक्रियते। तथा च शुक्तित्ववत् शुक्तिविशेष्यकत्वे सति अनुभवत्वस्य सत्वात् अतिव्याप्तिः, तद्वारणाय "तत्प्रकारकत्वम् दलम्। अत्र पूर्वं तत्पदेन शुक्तित्वस्य ग्रहणात् "तत्प्रकारकत्वम्" इत्यत्रापि शुक्तित्वमेव गृहीतव्यम्। तथा च शुक्तित्वप्रकारकत्वम् नास्तीति भ्रमे अतिव्याप्तिः वार्यते।

अत्र **पुनः प्रश्नः**- एवमपि रङ्गरजतयोः "इमे रजतरङ्गे" इत्याकारकसमूहालम्बनभ्रमे अतिव्याप्तिः। समूहालम्बनं नाम नानामुख्यविशेष्यकं ज्ञानम्। अस्मिन् ज्ञाने रजतम् मुख्यविशेष्यम्, रङ्गमपि मुख्यविशेष्यम्। अत्र च रजतांशे रङ्गत्त्वं प्रकारः, रङ्गांशे रजतत्वं प्रकार, यतः रङ्गरजते दृष्टवा "रजतरङ्गे" इति भ्रमः जातः। किन्तु अस्मिन् समूहालम्बनभ्रमे रजतत्ववद्रजतविशेष्यकत्वम् रजतत्वप्रकारकत्वमस्ति, एवम् रङत्त्ववद्रङ्गविशेष्यकत्वं रङ्गत्वप्रकारकत्वं चास्तीति अतिव्याप्तिरिति।

**समाधानम्**- विशेष्यत्वप्रकारत्वयोः निरूप्यनिरूपकभावो निवेश्यते। तथा च "तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्" इति निष्कर्षः। उक्तनिष्कर्षे तु अतिव्याप्तिर्न भवति। उक्तभ्रमे रङ्गांशे रजतत्वावगाहित्वेन रजतत्वं प्रकारः, एवं रजतांशे रङ्गत्वावगाहित्वेन रङ्गत्वं प्रकारः, तथा च रजतत्वनिष्ठप्रकारतायां रजतत्ववद्रजतनिष्ठविशेष्यतानिरूपितत्वं नास्ति, एवं रङ्गत्वनिष्ठप्रकारतायां रङ्गत्ववद्रङ्गनिष्ठविशेष्यतानिरूपितत्वं नास्ति, रजतनिष्ठविशेष्यतानिरूपितत्वमेवास्ति इत्यतः "तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वविशिष्टानुभवत्वस्य" उक्तभ्रमे असत्वात् अतिव्याप्तिः वार्यते। तथा च "तन्निष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपित-तन्निष्ठप्रकारतानिरूपकत्वविशिष्टानुभवत्वम्" यथार्थानुभवस्य लक्षणम्। तद्वन्निष्ठविशेष्यत्वं नाम तन्निष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यत्वम् इति परिष्कारः।

**अयथार्थानुभवलक्षणम्**

मूले "तदभाववति तत्प्रकारकोऽनुभवः अयथार्थः" इत्युक्तम्। अत्रापि सप्तम्यर्थः विशेष्यत्वम्, तस्य च निरूपकत्वसम्बन्धेन अनुभवे अन्वयः। तथा च "तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति अनुभवत्वम्" भ्रमस्य लक्षणम्। अस्य लक्षणस्य रङ्गे "इदं रजतम्" इत्याकारकभ्रमे समन्वयः। अस्मिन् भ्रमे रङ्गं विशेष्यम्, रजतत्वम् प्रकारः, तत्पदेन प्रकारीभूतधर्मो धर्तव्यः। तत् रजतम्, तदभावः = रजतत्वाभावः, तद्वत् = रजतत्वाभाववत् रङ्गम्, रङ्गनिष्ठविशेष्यतानिरूपकत्वमस्ति, एवम् = तत् = रजतत्वम्, तन्निष्ठप्रकारतानिरूपकत्वम्, एवम् अनुभवत्वमप्यस्तीति लक्षणसमन्वयः। अत्र अनुभवत्वदलानिवेशे "इदं रजतम्" इत्याकारक-अयथार्थस्मृतौ अतिव्याप्तिः, तत्रापि रजतत्वाभाववद्रङ्गविशेष्यकत्वरजतत्वप्रकारकत्वयोः सत्वात्, अतः अतिव्याप्तिवारणाय "अनुभवत्वम्" इति दलम्। स्मृतौ अनुभवत्वं नास्तीति अतिव्याप्तिर्वार्यते।

"तदभाववद्विशेष्यकत्वे सति अनुभवत्वमात्रोक्तौ" तत्प्रकारकत्वानिवेशे "इदं रजतम्" इति प्रमायाम् अतिव्याप्तिः, तत्रापि रङ्गत्वाभाववद्रजतविशेष्यकत्वमस्ति, अनुभवत्वमप्यस्तीति अतिव्याप्तिः। तद्वारणाय "तत्प्रकारकत्वम्" इति दलं निवेशनीयम्। अत्र 'तदभाववत्' इत्यत्र तत्पदेन रङ्गत्वं गृहीतम् इत्यतः तत्प्रकारकत्वम् इत्यत्रापि रङ्गत्वमेव तत्पदेन ग्राह्यम्। तथा च "इदं रजतम्" इति प्रमायाम् रङ्गत्वाभाववद्रजतविशेष्यकत्वसत्त्वेऽपि रङ्गत्वप्रकारकत्वं नास्ति इति अतिव्याप्तिर्वार्यते। एवम् "तत्प्रकारकत्वे सति अनुभवत्वमात्रोक्तौ" पुनरपि रजते "इदं रजतम्" इति प्रमायाम् अतिव्याप्तिः। तत्रापि रजतत्वप्रकारकत्वविशिष्टानुभवत्वसत्त्वात्, तद्वारणाय "तदभाववद्विशेष्यकत्वम्" इति दलम्। तत्र तत् रजतत्वम्, तदभाववद्रङ्गविशेष्यकत्वं नास्ति, तद्वद्विशेष्यकत्वमेवास्तीति अतिव्याप्तिः वार्यते। तथा च "तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति अनुभवत्वम्" इति लक्षणं भवति।

अत्र **प्रश्नः**- निरुक्तलक्षणस्य रङ्गरजयोः इमे रङ्गरजते इत्याकारकसमूहालम्बनप्रमायाम् अतिव्याप्तिः। समूहालम्बनं नाम नानामुख्यविशेष्यकं ज्ञानम्। अस्मिन् ज्ञाने रङ्गं मुख्यविशेष्यम्, रजतं अपि मुख्यविशेष्यम् भवति। अत्र रङ्गांशे रङ्गत्वमेव प्रकारः, रजतांशे रजतत्वं प्रकारः, तथा च अस्मिन्

समूहालम्बने रङ्गत्वाभाववद्रजतविशेष्यकत्वं, रङ्गत्वप्रकारकत्वम्, रजतत्वाभाववद्रङ्गविशेष्यकत्वम् रजतत्वप्रकारकत्वमप्यस्तीति भ्रमलक्षणस्य समूहालम्बनप्रमायाम् अतिव्याप्तिः इति ।

**समाधानम्**- विशेष्यत्वप्रकारत्वयोः निरूप्यनिरूपकभावो निवेश्यते। तथा च "तद्भाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वविशिष्टानुभवत्वम्" इति निष्कर्षः। उक्तनिष्कर्षे अतिव्याप्तिः न भवति। उक्तप्रमायां रङ्गांशे रङ्गत्वावगाहित्वेन रङ्गत्वमेव प्रकारः, रजतांशे रजतत्वावगाहित्वेन रजतत्वमेव प्रकारः, तथा च रङ्गत्वप्रकारतायां रङ्गत्वाभाववद्रजतनिष्ठविशेष्यतानिरूपितत्वं नास्ति, एवं रजतत्वप्रकारतायां रजतत्वाभारवद्रङ्गनिष्ठविशेष्यतानिरूपितत्वम् नास्ति, इत्यतः "तद्भाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वाभावात्" अतिव्याप्तिः वार्यते। तथा च "तद्भावनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वविशिष्टानुभव -त्वम्" भ्रमलक्षणम्।

**कारणनिरूपणम्**

"यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्" इत्यस्ति। यत्समवेतं = यस्मिन् समवेतं सत् = समवायेन सम्बद्धं सत्, कार्यम् उत्पद्यते तत् = समवायिकारणम्। यथा पटं प्रति तन्तवः। यस्मिन् = तन्तौ, समवायेन सम्बद्धः सन् पटः उत्पद्यते इत्यतः तन्तुः पटं प्रति समवायिकारणं भवति। तल्लक्षणं तु "समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वम्" इति। यत्र समवायेन कार्यम् तत्र तादात्म्येन कारणम् इति कारणनिष्ठप्रत्यासत्या कार्यकारणभावः तन्तौ समन्वयः = समवायसम्बन्धेन पटाधिकरणम् तन्तुः, तत्र तन्तुः तादात्म्यसम्बन्धेन विद्यते इति समवायसम्बन्धावच्छिन्नपटनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वम् तन्तौ अस्तीति समन्वयः। एवं क्रमेण समवायसम्बन्धावच्छिन्नघटनिष्ठकार्यतानिरूपिततादात्म्य-सम्बन्धावच्छिन्नकारणत्वम् कपाले अस्तीति कपालः घटस्य समवायिकारणम्। अत्र द्रव्यमेव समवायिकारणं भवितुमर्हति। "समवायेन जन्यद्रव्यत्वातवच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेनैव कारणत्वम्।

तस्मात् जन्यभावेषु द्रव्यगुणकर्मसु द्रव्यमेव समवायिकारणम्। द्रव्यं प्रति द्रव्यस्य अवयवः समवायिकारणम्। तथा च स्वगतरूपं प्रति पटः समवायिकारणम्, स्वगतक्रियां प्रति द्रव्यमेव समवायिकारणम्। तन्तुः पटं प्रति समवायिकारणं भवतीति समवायिकारणत्वं द्रव्यस्यैव।

**असमवायिकारणम्**

असमवायिकारणं द्विविधम्। "कार्येण सह एकस्मिन्नर्थे समवेतं सत् यत् कारणं तत् असमवायिकारणं" इत्येकम् यथा तन्तुसंयोगः पटस्य। कार्येण पटेन सह एकस्मिन्नर्थे = तन्तौ समवेतं सत् यत् कारणं – तन्तुसंयोगः, पटस्य असमवायिकारणम् इति प्रथमम्।

द्वितीयम्- "कारणेन सह एकस्मिन्नर्थे समवेतं सत् यत् कारणम् तत् असमवायिकारणं द्वितीयम्। यथा तन्तुरूपं पररूपस्य। अत्र कारणेन नाम "स्वकार्यसमवायिकारणेन" इत्यर्थः। स्वम् तन्तुरूपं, स्वकार्यम्- पटरूपम्, तत्समवायिकारणं पटः, तेन पटेन सह एकस्मिन्नर्थे - तन्तौ, समवेतं सत् यत् = तन्तुरूपं पटरूपस्य असमवायिकारणम् इति समन्वयः।

प्रथमासमवायिकारणे "यत्र समवायेन कार्यम् तत्र समवायेन कारणम् इत्यतः कार्यतावच्छेदकसम्बन्धः समवायः कारणतावच्छेदकोऽपि समवाय एव। तथा च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणत्वं प्रथमासमवायिकारणस्य लक्षणम्। पटः समवायेन तन्तौ वर्तते, एवं तन्तौ समवायेन तन्तुसंयोगोऽपि वर्तते इत्यतः समवायसम्बन्धावच्छिन्नपटनिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणत्वम् तन्तुसंयोगे वर्तते इति तन्तुसंयोगः पटस्य असमवायिकारणम् इति लक्षणसमन्वयः।

एवम् आद्यपतनस्य असमवायिकारणं गुरुत्वम्। तत्रापि समवायसम्बन्धावच्छिन्ना-द्यपतननिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणत्वं गुरुत्वे वर्तते। एवम् आद्यस्यन्दननिष्ठसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणत्वं द्रवत्वे वर्तते इति द्रवत्वम् आद्यस्यन्दनस्य असमवायिकारणं भवति।

द्वितीयासमवायिकारणे "यत्र समवायेन कार्यं तत्र स्वसमवायिसमवेतत्वसम्बन्धेन कारणम्" इत्यतः कार्यतावच्छेदकसम्बन्धः समवायः, कारणतावच्छेदकसम्बन्धः स्वसमवायिसमवेतत्वसम्बन्धः। तथा च पटरूपं प्रति तन्तुरूपम् - समवायेन पटरूपं पटे वर्तते, तत्र स्वसमवायिसमवेतत्वसम्बन्धेन = स्वम् = तन्तुरूपं, स्वसमवायि तन्तुः, तत्समवेतत्वम् पटे वर्तते इति पटनिष्ठप्रत्यासत्या कार्यकारणभावः। तथा च अस्य निष्कृष्टलक्षणं तु "समवायसम्बन्धावच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नकारणत्वम्" इति। समवायसम्बन्धावच्छिन्नपटरूपनिष्ठकार्यतानिरूपितस्वसमवायि-तन्तुसमवेतत्वसम्बन्धावच्छिन्नकारणत्वं तन्तुरूपे वर्तते इति समन्वयः। तथा च असमवायिकारणसामान्यलक्षणं तु "समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवाय-स्वसमवायिसमवेतत्व-अन्यतरसम्बन्धावच्छिन्नकारणत्वम्" इति भवति।

## बोधप्रश्नाः

1. न्यायबोधिन्याः मङ्गलश्लोकः कः?
2. कारणं कतिविधम्?
3. यथार्थानुभवः कतिविधः?
4. अनुमानं नाम किम्?
5. हेत्वाभासाः कति?

## शब्दावली

1. मङ्गलम्
2. शक्तिः
3. अव्याप्तिः

4. अतिव्याप्तिः
5. असंभवः
6. यथार्थानुभवः
7. करणम्
8. परामर्शः
9. व्याप्तिज्ञानम्
10. हेत्वाभासः

## सन्दर्भग्रन्थः


1. तर्कसंग्रहः- न्यायबोधिनीयुक्तः, मास्टर् खेलारी लाल् अण्ड् सन्स् , वाराणसी, १९३०


## सहायकग्रन्थाः


1. तर्कसंग्रहन्यायबोधिनी – बालमनोरमाव्याख्यासहिता, भार्गवपुस्तकालयम्, वाराणसी, १९५०
2. तर्कसंग्रहन्यायबोधिनी – सीताव्याख्यासहिता, कामेश्वरसिंह दर्भङ्गा संस्कृतविश्वविद्यालयः, दर्भङ्गा, १९८४


## बोधप्रश्नोत्तराणि

1. अखिलागमसंचारि श्रीकृष्णाख्यं परं महः।
   ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम्॥
2. त्रिविधम् – समवायिकारणम्, असमवायिकारणम्, निमित्तकारणं चेति
3. चतुर्विधः - प्रत्यक्षानुमित्युपमितिशब्दभेदात्
4. अनुमितिकरणम्

5. पञ्च – सव्यभिचारः, विरुद्धः, असिद्धः, सत्प्रतिपक्षः, बाधितः चेति

**अभ्यासप्रश्नाः**

1. आधाराधेयभावस्य पञ्चविंशति उदाहरणानि लेखनीयानि
2. कार्यकारणभावस्य पञ्चविंशति उदाहरणानि लेखनीयानि
3. प्रमाणानां भेदः स्पष्टं लेखनीयः

## खण्डः 2

**पाठपरिचयः**

- **प्रस्तावना**
- **उद्देश्यम्**
- **मूलम्**
- **विषयसारः**
- **बोधप्रश्नाः**
- **शब्दावली**
- **सन्दर्भग्रन्थः**
- **सहायकग्रन्थाः**
- **बोधप्रश्नोत्तराणि**
- **अभ्यासप्रश्नाः**

**प्रस्तावना**

न्यायशास्त्रीयप्रमाणेषु चतुर्षु आदिमे द्वे प्रत्यक्षानुमाने पूर्वखण्डे निरूपिते सति इदानीं अस्मिन् खण्डे अवशिष्टे द्वे प्रमाणे उपमानशब्दाख्ये निरूपयिष्येते। तत्रादौ उपमानं भवति, तत्र सादृश्यज्ञानमेव उपमानमिति निरूपितम् एवमेव अतिदेशवाक्यार्थस्मरणं व्यापारः, संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः इति च व्यवस्थापितम्। शब्दखण्डे तावत् पदज्ञानस्य शाब्दबोधकरणत्वं व्यवस्थापितं, पदपदार्थसंबन्धः वृत्तिः निरूपितः। वृत्तिश्च द्विविधा – शक्तिः लक्षणा चेति तत्र शक्तिः ईश्वरेच्छा, लक्षणा शक्यसंबन्धः, सा च त्रिधा जहल्लक्षणा, अजहल्लक्षणा,जहदजहल्लक्षणा चेति इति निरूप्य अन्ते आकाङ्क्षा, योग्यता, सन्निधिः, तात्पर्यं च शाब्दसामग्र्यः भवन्ति इति व्यवस्थाप्य वेदस्य पौरुषेयत्वं व्यवस्थापितम्।

## उद्देश्यम्

- उपमानस्य पृथक् प्रमाणत्वमस्तीति जानाति
- पदपदार्थयोः कश्चित् संबन्ध अस्तीति विजानाति
- लक्षणायाः त्रैविध्यं जानाति
- शाब्दसामग्र्याः परिचयो भवति
- वेदस्य पौरुषेयत्वमेव इति न्यायशास्त्रीयतत्वमवगच्छति

### उपमानपरिच्छेदः

**उपमितिकरणमुपमानम्। संज्ञासज्ञिसंबन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। तथाहि- कश्चिद् गवयशब्दवाच्य(पदार्थ)मजानन् कुतश्चिदारण्यकपुरुषात् "गोसदृशो गवय" इति श्रुत्वा वनं गतः, गोसदृशपिण्डं पश्यन् वाक्यार्थं स्मरति। तदनन्तरं "अयं गवयपदवाच्यः" इत्युपमितिरुत्पद्यते।**

उपमानं लक्षयति- **उपमितिकरणमिति**। उपमितिं लक्षयति- **संज्ञासंज्ञी**ति। संज्ञा नाम पदम्। संज्ञी अर्थः। तयोः सम्बन्धः शक्तिः। तथा च पदपदार्थसम्बन्धज्ञानमुपमितिरित्यर्थः। उपमानं नामातिदेशवाक्यार्थज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। उपमितिः फलम्। गोसदृशो गवयपदवाच्य इत्याकारकवाक्याद्गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकं यज्ज्ञानं जायते तदेव करणम्।

**इति न्यायबोधिन्यामुपमानपरिच्छेदः समाप्तः॥**

## शब्दपरिच्छेदः

**आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं तु पदसमूहः। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः।**

शब्दं लक्षयति- **आप्तेति**। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम्। वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिरत आप्तोच्चरितत्वनिवेशः। तावन्मात्रोक्तौ जबगडदशादावतिव्याप्तिरतो वाक्यत्वम्। आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम्। तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नार्थः। वस्तुतस्तु पदज्ञानं करणम्। वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः, फलम्। वृत्तिर्नाम शक्तिलक्षणान्यतररूपा। शक्तिर्नाम घटादिपदजन्यबोधविषयत्वप्रकारकेश्वरसङ्केतः। ईश्वरसंकेतो नाम ईश्वरेच्छा। सैव शक्तिरित्यर्थः। शक्तिनिरूपकत्वमेव पदे शक्तत्वम्। विषयतासंबन्धेन शक्याश्रयत्वं अर्थे शक्यत्वम्। शक्यसंबन्धो लक्षणा। सा द्विविधा गौणी शुद्धा चेति। गौणी नाम सादृश्यविशिष्टे लक्षणा। यथा सिंहो माणवक इत्यादौ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा। शुद्धा त्रिविधा। जहल्लक्षणा

अजहल्लक्षणा जहदजहल्लक्षणा चेति। लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रबोधप्रयोजिका लक्षणा जहल्लक्षणा। यथा गङ्गायां घोष इत्यत्र गङ्गापदशक्यप्रवाहसंबन्धस्य तीरे सत्त्वात्तादृशशक्यसंबन्धरूपलक्षणाज्ञानाद्गङ्गापदात्तीरोपस्थितिः। लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका लक्षणा अजहल्लक्षणा। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य दध्युपघातुके लक्षणा। लक्ष्यतावच्छेदकदध्युपघातुकत्वेन रूपेण दध्युपघातुकानां काकबिडालकुक्कुटादीनां शक्य लक्ष्याणां सर्वेषां बोधात्। शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका जहदजहल्लक्षणा। यथा तत्त्वमसीत्यत्र सर्वज्ञत्वकिंचिज्ज्ञत्वपरित्यागेन व्यक्तिमात्रबोधनात् जहदजहल्लक्षणा। इयं च लक्षणा जीवब्रह्मणोरैक्यं ब्रुवतां वेदान्तिनां सिद्धान्तरीत्या।

**आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। आकाक्षादिरहितं वाक्यं न प्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणम् आकाङ्क्षाविरहात्। अग्निना सिञ्चतीति वाक्यं न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादि पदानि न प्रमाणं सान्निध्याभावात्।**

**आकाङ्क्षेति**। अव्यवहितोत्तरत्वादिसंबन्धेन यत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तो हि यादृशशाब्दबोधाभावस्तादृशशाब्दबोधे तत्पदे तत्पदवत्वमाकाङ्क्षा। यथा घटमित्यादिस्थलेऽव्यवहितोत्तरत्वादिसंबन्धेन अम्पद घटपदवदित्याकारकाम्पदविशेष्यकघटपदप्रकारकज्ञानसत्त्वे घटीयं कर्मत्वमिति बोधो जायते। अम् घट इति विपरीतोच्चारणे तु तादृशज्ञानाभावात्तादृशशाब्दबोधो न जायते। अतस्तादृशाकाङ्क्षाज्ञानं शाब्दबोधे कारणम्। **अर्थाबाध** इति। बाधाभावो योग्यतेत्यर्थः। अग्निना सिञ्चतीत्यत्र सेककरणत्वस्य जलधर्मस्य

वह्नौ बाधनिश्चयसत्त्वान्न तादृशवाक्याच्छाब्दबोधः। संनिधिं निरूपयति- **असहोच्चारितानी**ति। असहोच्चारितानि विलम्बेनोच्चरितानि।

**वाक्यं द्विविधम्। वैदिकं लौकिकं चेति। वैदिकमीश्वरोक्तत्वात् सर्वमपि प्रमाणम्। लौकिकं त्वाप्तवाक्यं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं शब्दः। एवं यथार्थानुभवो निरूपितः।**

**वैदिकमि**ति। वेदवाक्यमित्यर्थः। इदमुपलक्षणम्। वेदमूलकस्मृत्यादीन्यपि ग्राह्याणि। **लौकिकमिति।** वेदवाक्यभिन्नमित्यर्थः॥

**इति न्यायबोधिन्यां शब्दपरिच्छेदः समाप्तः॥**

## विषयसारः

अस्मिन् खण्डे प्रधानतया विचारितानां विषयानां संग्रहः क्रियते।

**शब्दखण्डः**

आप्तोच्चरितत्वे सति वाक्यत्वं प्रमाणशब्दस्य लक्षणं। पयसा सिञ्चति इति शब्दे पदसमूहत्वरूपवाक्यत्वमस्ति, यथार्थवक्तृरूपाप्तेन उच्चरितत्वमप्यस्तीति समन्वयः। वाक्यत्वमात्रोक्तौ वह्निना सिञ्चति इति वाक्ये अतिव्याप्तिः , तत्रापि वाक्यत्वस्य सत्त्वात् तद्वारणाय आप्तोच्चरितत्वदलम् । अस्मिन् वाक्ये आप्तोच्चरितत्वं नास्ति यतः यथार्थवक्तृत्वमेव आप्तत्वम् । तथा च वह्निकरणकत्वं सेचने बाधितम्। तथा च बाधितार्थवक्तृत्वरूपानाप्तोच्चरितत्वमेवास्ति, आप्तोच्चरितत्वं नास्तीति नातिव्याप्तिः। आप्तोच्चरितत्वमात्रोक्तौ जवगडदशारौ अतिव्याप्तिः तद्वारणाय वाक्यत्वं । तत्र वाक्यत्वं नास्तीति अतिव्याप्तिः वार्यते। आप्तत्वं नाम यथार्थवक्तृत्वं, तत्तु प्रयोगहेतुभूतयथार्थज्ञानजन्यवाक्यं प्रमाणशब्दः इति निष्कर्षः।

**वस्तुतस्तु कल्पः**- पदस्य करणत्वं न सम्भवति। पदाभावे मौनिश्लोकादौ शाब्दबोधो जायते इत्यतः कारणाभावेऽपि कार्योत्पत्तिरूपव्यतिरेकव्यभिचारः। तस्मात् पदज्ञानम् करणम् वृत्तिज्ञानाधीनपदज्ञानजन्यपदार्थोपस्थितिः व्यापारः। अत्र उपस्थितौ पदज्ञानजन्यत्वानिवेशे

प्रत्यक्षेणोपस्थितस्यापि शाब्दबोधापत्तिः। तस्मात् पदज्ञानजन्यत्वम् विशेषणम्। इन्द्रियेणोपस्थितस्य पदज्ञानजन्यत्वाभावात् शाब्दबोधे मानं न सम्भवति। एवं पदज्ञानजन्यत्वे वृत्तिज्ञानसहकृतत्वं निवेशनीयम्। अन्यथा घटपदात् समवायेन आकाशोपस्थितिः जायते, तत्र आकाशोपस्थितेरपि पदज्ञानजन्यत्वात् तस्य शाब्दबोधे भानं स्यात् । तद्वारणाय वृत्तिज्ञानसहकृतत्वं वक्तव्यम्। घटपदवृत्त्या घटोपस्थितिरेव जायते, आकाशस्य घटपदवृत्यधीनोपस्थितिविषयत्वं नास्तीति शाब्दबोधे भानं न संभवति। तथा च वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिः व्यापारः। व्यापारः नाम तज्जन्यत्वे सति तज्जन्यजनकत्वम्। तत् पदज्ञानं, तज्जन्यत्वं वृत्तिज्ञानाधीनपदार्थोपस्थितौ अस्ति। एवं तत् पदज्ञानं तज्जन्यः शाब्दबोधः, तज्जनकत्वं पदार्थोपस्थितौ अस्तीति समन्वयः। एवं क्रमः पदज्ञानं, पदजन्यपदार्थोपस्थितिः, ततः शाब्दबोधः इति।

अत्र पदज्ञानजन्यपदार्थोपस्थितेः व्यापारत्वेऽपि पुरुषो हस्तीति वाक्यात् शाब्दबोधापत्तिः। अत्रापि तत्तत्पदज्ञानजन्यतत्तदुपस्थितेः सत्वात्। अतः आकाङ्क्षादिमत्पदज्ञानजन्यपदार्थोपस्थितिः व्यापारः वक्तव्यः। उदाहृतवाक्ये आकाङ्क्षाभावात् आकाङ्क्षादिमत्पदज्ञानजन्यपदार्थोपस्थितेरभावात् न शाब्दबोधः।

आकाङ्क्षा नाम अव्यवहितोत्तरत्वस्वाव्यवहितपूर्वोत्त्वान्यतरसम्बन्धेन यत्पदाभावप्रयुक्तः यत्पदस्य शाब्दबोधजनकत्वाभावः, तत्पदे तत्पदवत्वम् आकाङ्क्षा इत्यर्थः। घटम् इत्यत्र पदद्वये समन्वयः। यत्पदस्य - घटपदस्य, शाब्दबोधजनकत्वाभावः "घटनिष्ठं कर्मत्वं" इति बोधजनकत्वाभावः यत्पदाभावप्रयुक्तः अम्पदाभावप्रयुक्तः इत्यर्थः। तत्पदे - घटपदे , तत्पदवत्वम् अव्यवहितोत्तरत्वसम्बन्धेन अम्पदवत्त्वम् आकाङ्क्षा इति समन्वयः।

योग्यता नाम अर्थाबाधः-बाधाभावः इत्यर्थः। "अग्निना सिञ्चति" इत्यत्र सेचने अग्निकरणकत्वाभावात् योग्यताभावात् न शाब्दबोधः। सन्निधिर्नाम अविलम्बेन पदोच्चारणम्। तात्पर्यं नाम तत्प्रतीतीच्छया उच्चरितत्वम्। आकाङ्क्षादिचतुष्टयं शाब्दबोधे कारणं भवति।

**शक्तिलक्षणानिरूपणम्**

शाब्दबोधे पदज्ञानं कारणं , वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिः व्यापारः इत्युक्तम् । अत्र वृत्तिर्नाम का? इत्युक्ते – वृत्तिः शक्तिलक्षणान्यतररूपा। शक्तिः "अस्मात् पदात् अयमर्थो बोद्धव्यः" इति ईश्वरसंकेतरूपा। एतत्पदजन्यबोधविषयोऽयमर्थः इत्याकारकेश्वरेच्छा एव शक्तिः। यथा "घटः घटपदजन्यबोधविषयोः भवतु इति। तथा च शक्तिविषयः अर्थः शक्तिनिरूपकं पदम्। तथा च निरूपकतासम्बन्धेन इत्युक्तम्। लक्षणापि शब्दवृत्तिः शक्यसम्बन्धरूपा लक्षणा। यस्मिन् स्थले शक्यार्थस्य अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा प्रतिसन्धीयते तत्र लक्षणया बोधः जायते। लक्षणा द्विविधा- गौणी, शुद्धा चेति।

गौणी नाम सादृश्यविशिष्टे लक्षणा। उदाहरणं " सिंहो माणवकः" इत्यत्र सिंहाभिन्नो मानवकः इति बोधे वक्तव्ये माणवके सिंहतादात्म्याभावात् सिंहपरस्य सिंहसदृशे लक्षणा। सादृश्यम् नाम तद्वृत्तिधर्मवत्वं। सिंहवृत्तिधर्मः शौर्यादिकम् , तद्वत्वं माणवके अस्तीति सिह्मपरस्य सिम्हसादृश्यविशिष्टे लक्षणा तथा च सिंहसदृशाभिन्नो माणवकः इति बोधो जायते।

शुद्धा त्रिविधा – जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति।

जहल्लक्षणा नाम "लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रविषयकबोधप्रयोजिका लक्षणा। यथा "गंगायां घोषः" इत्यत्र गंगाशब्दस्य तीरत्वेन रूपेण तीरे लक्षणा।

अजहल्लक्षणा नाम- लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयविषयकबोधप्रयोजिका लक्षणा। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य दध्युपघातकत्वेन रूपेण दध्युपघातकत्वविशिष्टेषु लक्षणा।

जहदजहल्लक्षणा नाम – "शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका लक्षणा। यथा तत्वमसीति वाक्ये तत्पदस्य सर्वज्ञत्वविशिष्टवाचकस्य केवले ब्रह्मणि लक्षणा।

**बोधप्रश्नाः**

1. उपमितिः नाम का?
2. उपमानस्य व्यापारः कः?
3. शाब्दबोधं प्रति किं करणम्?
4. लक्षणा कतिविधा?
5. शाब्दसामग्र्यः कति सन्ति ?

**शब्दावली**

1. उपमितिः
2. सादृश्यज्ञानम्
3. अतिदेशवाक्यार्थस्मरणम्
4. जहल्लक्षणा
5. अजहल्लक्षणा
6. जहदजहल्लक्षणा
7. आकाङ्क्षा
8. योग्यता
9. सन्निधिः
10. तात्पर्यं

**सन्दर्भग्रन्थः**

1. तर्कसंग्रहः- न्यायबोधिनीयुक्तः, मास्टर् खेलारी लाल् अण्ड् सन्स् , वाराणसी, १९३०

## सहायकग्रन्थाः

1. तर्कसंग्रहन्यायबोधिनी – बालमनोरमाव्याख्यासहिता, भार्गवपुस्तकालयम्, वाराणसी, १९५०
2. तर्कसंग्रहन्यायबोधिनी – सीताव्याख्यासहिता, कामेश्वरसिंह दर्भङ्गा संस्कृतविश्वविद्यालयः, दर्भङ्गा, १९८४

## बोधप्रश्नोत्तराणि

1. संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः
2. अतिदेशवाक्यार्थस्मरणम्
3. पदज्ञानम्
4. त्रिविधा – जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति
5. चतस्रः – आकाङ्क्षा, योग्यता, सन्निधिः, तात्पर्यं चेति

## अभ्यासप्रश्नाः

1. उपमानप्रमाणं निरूपयत
2. लक्षणात्रैविध्यं यथाग्रन्थं निरूपयत
3. शाब्दसामग्रीः निरूप्य तेषां क्रमशः लक्षणसमन्वयं करुत

# खण्डः 3

## पाठपरिचयः

- प्रस्तावना
- उद्देश्यम्
- मूलम्
- विषयसारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

प्रमाणचतुष्टयं निरूप्य पूर्वप्रस्तुतबुद्धिनिरूपणे अयथार्थानुभवः अस्मिन् खण्डे आदौ निरूप्यते। अयथार्थानुभवः त्रिविधः भवति संशयविपर्ययशब्दभेदात्। तेषां लक्षणानि च प्रतिपादितानि क्रमेण। ततः

परं क्रमशः अवशिष्टाः गुणाः प्रतिपादिताः, तत्रापि भावनाख्यसंस्कारविषये महान् विचारः कृतः न्यायबोधिन्याम्। अनन्तरं पञ्चविधकर्मणां लक्षणमुक्तम्, ततः नित्यत्वे सति अनेकसमवेतत्वमिति सामान्यस्य लक्षणमुक्तम् एवमेव विशेषसमवायाभावानां लक्षणानि निरुक्तानि। ततः परं सप्तपदार्थाः एव इति निर्धारणं कृतम्।

## उद्देश्यम्

- अयथार्थानुभवप्रभेदान् विशेषतः अवगच्छति
- विशेषपदार्थस्य स्वरूपम् न्यायशास्त्रदिशा जानाति
- अभावचातुर्विध्यं सरलतया विजानाति
- भावनासंस्कारविषये विस्तरेण ज्ञानं प्राप्नोति
- सूत्रोक्तपदार्थानां सप्तस्वेव अन्तर्भावः करणीयः इति ज्ञायते

**अयथार्थानुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि- ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमिति। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति। स्मृतिरपि द्विविधा। यथार्था अयथार्था चेति। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था।**

यथार्थानुभवं निरूप्यायथार्थानुभवं विभजते- **संशयेत्यादिना**। **एकेति**। एकधर्मावच्छिन्नविशेष्यकभावाभावप्रकारकज्ञानं संशय इत्यर्थः। भावद्वयकोटिकसंशयप्रसिद्धेः स्थाणुर्वेत्यादौ स्थाणुत्वस्थाणुत्वाभावपुरुषत्वपुरुषत्वाभावकोटिकसंशय एवार्थः। **मिथ्याज्ञानमिति**। अयथार्थज्ञानमित्यर्थः। विपर्ययो नाम भ्रमः। **व्याप्यारोपेणेति**। तर्के व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणम्। अन्यथा इष्टापत्तिदोषेण तर्कानुत्पत्तेः।

**सर्वेषामनुकूलतया वेदनीयं सुखम्।**

सुखं निरूपयति- **सर्वेषामिति**। इतरेच्छाऽनधीनेच्छाविषयत्वमिति निष्कर्षः। यथाश्रुते घटोऽनुकूल इत्याकारकानुकूलत्वप्रकारकज्ञानविशेष्यत्वस्य घटादावपि सत्वात्तत्रातिव्याप्तेः। सुखेच्छाधीने भोजनादावतिव्याप्तिवारणाय इतरेच्छानधीनेतीच्छाविशेषणम्। सुखेच्छा तु सुखत्वप्रकारकज्ञानजन्यैव।

**प्रतिकूलतया वेदनीयं दुःखम्। इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः।**

दुःखं निरूपयति - **प्रतिकूलेति**। अत्रापीतरद्वेषानधीनद्वेषविषयत्वमिति निष्कर्षः। द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिः तत्रापि द्वेषविषयत्वसत्त्वादतः तत्रातिव्याप्तिवारणाय **इतरद्वेषानधीनेति** द्वेषविशेषणम्। सर्पजन्यदुःखादौ द्वेषात्सर्पे द्वेष इति सर्पद्वेषस्य सर्पजन्यदुःखद्वेषजन्यत्वादन्यद्वेषाजन्यद्वेषविषयत्वरूपलक्षणस्य सर्पादौ नातिव्याप्तिः। फलेच्छा उपायेच्छां प्रति कारणम्। अतः फलेच्छावशादुपायेच्छा भवति। एवं फलद्वेषात् उपायद्वेषः।

**विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्योऽधर्मः। बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य अनित्या जीवस्य। संस्कारस्त्रिविधः। वेगो भावना स्थितस्थापकश्चेति। वेगः पृथिव्यादि चतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितस्थापकः। कटादि पृथिवीमात्रवृत्तिः।**

**चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम्। शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।**

धर्माधर्मौ निरूपयति- **विहितेत्या**दिना। वेदविहितेत्यर्थः। **निषिद्धे**ति। वेदनिषिद्धेत्यर्थः। **बुद्ध्यादयोऽष्टा**विति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा इत्यर्थः। संस्कारं विभजते- **संस्कार** इति। भावनां लक्षयति- **अनुभवे**ति। अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम्। अत्रानुभवजन्यत्वे सतीति विशेषणानुपादाने आत्ममनःसंयोगेऽतिव्याप्तिरात्ममनःसंयोगस्य ज्ञानमात्रं प्रत्यसमवायिकारणत्वेन स्मृतिं प्रत्यपि कारणत्वादतस्तदुपादानम्। आत्ममनःसंयोगस्यानुभवजन्यत्वाभावान्नातिव्याप्तिः। तावन्मात्रे कृतेऽनुभवध्वंसेऽतिव्याप्तिः। ध्वंसं प्रति स्वप्रतियोगिनः कारणत्वेनानुभवध्वंसस्याप्यनुभवजन्यत्वात्। अतः स्मृतिहेतुत्वोपादानम्। अनुभवध्वंसे स्मृतिहेतुत्वाभावान्नातिव्याप्तिः। नन्वत्र विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणता सकलतान्त्रिकमतसिद्धा। यथा दण्डविशिष्टबुद्धिं प्रति दण्डज्ञानं कारणम्। दण्डविशिष्टबुद्धिर्नाम दण्डप्रकारकज्ञानम्। तथा च दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रति दण्डज्ञानत्वेन कारणत्वमित्यापतितम्। दण्डप्रकारकबुद्धिर्दण्डी पुरुष इत्याकारकबुद्धिस्तत्र दण्डज्ञानं कारणम्। न हि दण्डमजानानः पुमान् दण्डी पुरुष इति प्रत्येति। एवं च यत्रायं दण्ड इति प्रत्यक्षं जातं तदनन्तरं दण्डी पुरुष इत्याकारकप्रत्यक्षमुत्पन्नं तत्र दण्डी पुरुष इत्याकारकप्रत्यक्षेऽतिव्याप्तिः। तद्धि स्वाव्यवाहितपूर्वक्षणोत्पन्नदण्डज्ञानात्मकानुभवजन्यं जनिष्यमाणे दण्डी पुरुष इत्याकारकस्मरणे कारणं च स्मृतिं प्रत्यनुभवस्य कारणत्वात्। तथा चानुभवजन्यत्वे सति स्मृतिहेतुत्वरूपभावनालक्षणस्य यथोक्तदण्डी पुरुष इत्याकारकानुभवे विद्यमानत्वादतिव्याप्तिरिति चेत्। **अत्र ब्रूमः**। अनुभवजन्यत्वं अनुभवनिष्ठकारणतानिरूपितकार्यताश्रयत्वम्। तत्र कारणतायामनुभवत्वावच्छिन्नत्वं निवेश्यते। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वमनुभवजन्यत्वमिति फलितम्। अतो नोक्तातिव्याप्तिः। तथा हि। दण्डप्रकारकबुद्धित्वावच्छिन्नकार्यतानिरूपितदण्डज्ञाननिष्ठा या कारणता तस्याः न दण्डानुभवत्वमवच्छेदकं दण्डानुभवात् दण्डस्मरणादपि दण्डप्रकारकबुद्धेरुत्पत्तेः। अतो

दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रत्यनुभवस्मरणसाधारणदण्डज्ञानत्वेनैव दण्डज्ञानस्य कारणतायाः स्वीकरणीयत्वेन दण्डज्ञानत्वस्यैव तदवच्छेदकत्वात्। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य यथोक्तप्रत्यक्षानुभवेऽभावान्नातिव्याप्तिः। भावनायां तु लक्षणमिदं वर्तते। तथा हि। अनुभवेनैव भावनाख्यसंस्कारोत्पत्या भावनात्वावच्छिन्नं प्रत्यनुभवस्यानुभवत्वेनैव कारणतया भावनात्वावच्छिन्नकार्यतानिरूपितानुभवनिष्ठा या कारणता तस्यामनुभवत्वमवच्छेदकम्। अतोऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं भावनायां वर्तत इति नासंभवः।

नन्वेवं स्मृतिहेतुत्वविशेषणवैयर्थ्यमापद्यते। तद्यनुभवध्वंसेऽतिव्याप्तिवारणाय प्रागुपात्तम्। न हि यथोक्तानुभवजन्यत्वविवक्षायामनुभवध्वंसेऽतिव्याप्तिः प्रसज्यते। तथा हि। ध्वंसत्वावच्छिन्नं प्रति प्रतियोगिनः कारणत्वं प्रतियोगित्वेन रूपेण तत्तद्ध्वंसत्वावच्छिन्नं प्रति तत्तत्प्रतियोगिव्यक्तेस्तत्तद्व्यक्तित्वेन कारणत्वमित्येवं ध्वंसप्रतियोगिनोः कार्यकारणभावः। तथा च ध्वंसनिष्ठकार्यतानिरूपिता यानुभवनिष्ठा कारणता तस्यां प्रतियोगित्वमवच्छेदकं तत्तद्व्यक्तित्वं च। न त्वनुभवत्वमपीति सिद्धान्तात्। अन्यत्र दूषितत्वात्। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपानुभवजन्यत्वविरहेणैव अतिव्याप्तिवारणसंभवात्कृतं स्मृतिहेतुत्वविशेषणेनेति चेन्न।

स्मृतावतिव्याप्तिवारणायैव तद्विशेषणप्रवेशात्। तथा हि। स्मृतिं प्रत्यनुभव एव कारणं। न तु स्मृतिरप्यतो घटस्मृतित्वावच्छिन्नं प्रति घटानुभवस्य घटानुभवत्वेनैव कारणत्वम्। न तु घटज्ञानत्वेन। तथा च घटस्मृतिनिष्ठकार्यतानिरूपिता या घटानुभवनिष्ठा कारणता तस्यां घटानुभवत्वं अवच्छेदकम्। तेन अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य स्मृतौ विद्यमानत्वादतिव्याप्तिवारणाय स्मृतिहेतुत्वं उक्तम्। न हि स्मृतिः स्मृतिहेतुः। अतः न तत्रातिव्याप्तिरित्यलं पल्लवतल्लजकल्पानल्पजल्पनेन।

**नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्तिः। तद् द्विविधम् पराऽपरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।**

सामान्यं निरूपयति- **नित्यमेकमिति**। नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणम्। नित्यत्वानुपादाने संयोगादावतिव्याप्तिः। तत्रापि अनेकसमवेतत्वसत्त्वात्। तद्वारणाय नित्यत्वविशेषणम्। अनेकसमतत्वानुपादाने आकाशादावतिव्याप्तिस्तद्वारणायानेकसमवेतत्वविशेषणम्। अनेकत्वानुपादाने जलपरमाणुगतरूपादेराकाशगतैकत्वपरिमाणादेर्नित्यत्वात्, समवेतत्वाच्च अतिव्याप्तिः। अतः **अनेके**ति।

**नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।**

**नित्यद्रव्यवृत्तय** इति। नित्यद्रव्येषु परमाण्वादिषु वर्तमानाः। अत एव व्यावर्तकाः इतरभेदानुमितिहेतवः। नित्यद्रव्यवृत्तित्वरूपपक्षधर्मताप्रयोज्येतरभेदानुमापकताशालिन इत्यर्थः। नित्यद्रव्यनिष्ठविशेष्यतानिरूपितैकमात्रवृत्तिभेदानुमितिजनकतावच्छेदकप्रकारताश्रयत्वं विशेषाणां लक्षणमिति भावः। पार्थिवपरमाणौ जलादिभेदानुमापकगन्धेऽतिव्याप्तिवारणाय एकमात्रवृत्तित्वं भेदविशेषणम्। घटादौ तदितरभेदानुमापके तद्रूपादावतिव्याप्तिवारणाय निरूपितान्तम् प्रकारताविशेषणम्। एतेन व्यावर्तका इत्यस्य नित्यद्रव्यविशेष्यकेतरभेदानुमितिप्रयोजका इत्यर्थकतया लक्षणपरत्वेन साफल्येऽपि नित्यद्रव्यवृत्तय इति विफलमेव स्वरूपाख्यानस्यापि कृतत्वादिति प्रत्युक्तम्।

**नित्यसंबन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेव अवतिष्ठते तावयुतसिद्धौ। यथा अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति।**

सामान्यं निरूपयति **नित्येति**। सम्बन्धवत्वं विशिष्टप्रतीतिनियामकत्वम्। तावन्मात्रोक्तौ संयोगेऽतिव्याप्तिरतो नित्येति विशेषणम्। **ययोर्द्वयोर्मध्य** इति। यन्निष्ठकालनिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभयान्यतरत्वमयुतसिद्धत्वमित्यर्थः।

**अनादि: सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसाभावः। उत्पत्तेरनन्तरं कार्यस्य। त्रैकालिकसंसर्गाभावोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति।**

अत्यन्ताभावं निरूपयति **त्रैकालिकेति**। प्रागभावाऽप्रतियोगित्वे सति ध्वंसाऽप्रतियोगित्वे सत्यन्योन्याभावभिन्नत्वे सत्यभावत्वमत्यन्ताभावस्य लक्षणम्। ध्वंसप्रागभावान्योन्याभावाकाशादीनां वारणाय यथाक्रमं विशेषणोपादानम्। वस्तुतस्तु संसर्गाभावत्वं तादात्म्यभिन्नसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। ध्वंसप्रागभावयोश्च न संसर्गावच्छिन्नप्रतियोगिताकत्वमिति तेनैव तद्वारणे त्रैकालिकेति स्वरूपाख्यानमेवेति बोध्यम्। अन्योन्याऽभावं निरूपयति **तादात्म्येति**। अभावत्रयवारणाय विशेषणम्। घटाभाववान्नेति प्रतीतिविषयघटादिवारणाय विशेष्यम्।

**सर्वेषां पदार्थानामुक्तेष्वेवान्तर्भावात्सप्तैव पदार्था इति सिद्धम्।**

ननु सादृश्यादीनामतिरिक्तपदार्थानामनिरूपणेन न्यूनतेत्यत आह- **सर्वेषामिति**। "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायस्यादिमसूत्र उक्तानां प्रमाणप्रमेयादीनाम् इत्यर्थः।

तद्भिन्नत्वविशिष्टतद्गतभूयोधर्मरूपसादृश्यस्यापि घटपटादिरूपत्वेन नातिरिक्तत्वमेवमन्येषामप्यूह्यम्। विस्तरस्त्वन्यत्रानुसन्धेयः।

**काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।**

**अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः।।**

**काणादेति।** कणादस्येदं काणादं काणादन्यायमते इति द्वन्द्वगर्भकर्मधारयः। कणादप्रोक्तगौतमप्रोक्तमतयोरिति यावत्। काणादन्यायाभिन्नमतद्वयविषयकबालसमवेत-अभिन्नव्युत्पत्तिसिद्धप्रयोजकान्नंभट्टाभिन्नविद्वन्निष्ठभूतकालीनकृतिविषयाभिन्नस्तर्कसंग्रहाख्यग्रन्थ इत्यन्वयबोधः॥

**कृष्णावलम्बिनो गाः पुषो गोवर्धनस्तमभ्यर्चन्।**

**विपुलाभीरसभाजनजनितविबुधेन्द्रस्तवाभिरचनाभिः॥**

**इति तर्कसंग्रहव्याख्या न्यायबोधिन्याख्या संपूर्णा॥**

## विषयसारः

अस्मिन् खण्डे प्रधानः विषयो भवति भावनाविचारः। अतः स अत्र संग्रहेण विचार्यते।

### भावनाविचारः

अनुभवजन्या स्मृतिहेतुः भावना इति तर्कसंग्रहे उक्तम्। अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनायाः लक्षणमिति फलितम्। भावनाख्यसंस्कारे अनुभवजन्यत्वमस्ति एवं स्मृतिहेतुत्वमपि अस्ति इति समन्वयः।अनुभवजन्यत्वानिवेशे स्मृतिहेतुत्वमात्रोक्तौ ज्ञानसामान्यकारणे आत्ममनःसंयोगे अतिव्याप्तिः। तद्वारणाय अनुभवजन्यत्वमिति दलम्। आत्ममनःसंयोगे अनुभवजन्यत्वं नास्तीति नातिव्याप्तिः। अनुभवजन्यत्वमात्रोक्तौ अनुभवध्वंसे अतिव्याप्तिः। तथाहि- ध्वसं प्रति प्रतियोगिनः

कारणत्वं वक्तव्यम्। तथा च अनुभवध्वंसं प्रति अनुभवस्य कारणत्वेन अनुभवजन्यत्वस्य अनुभवध्वंसेऽपि सत्त्वात् अतिव्याप्तिः। तद्वारणाय स्मृतिहेतुत्वमिति दलम्। तथा च अनुभवध्वंसे स्मृतिहेतुत्वविरहात् नातिव्याप्तिः।

**पूर्वपक्षः** –

एवमपि " दण्डी पुरुषः इति विशिष्टबुद्धौ अतिव्याप्तिः भवति। कथमिति चेत् इत्थं – विशिष्टबुद्धिं प्रति विशेषणज्ञानं कारणम्। तथा च "दण्डी पुरुषः" इति दण्डरूपविशेषणविशिष्टज्ञानं प्रति विशेषणीभूतदण्डज्ञानं कारणम्। दण्डज्ञानं नास्ति चेत् "अयं दण्डविशिष्टः इति ज्ञानं नैव जायते। तथा च दण्डज्ञानरूपानुभवजन्यत्वे सति स्मृतिहेतुत्वं विशिष्टबुद्धौ अस्तीति अतिव्याप्तिः भवति।

**समाधानम्**

अनुभवजन्यत्वं नाम अनुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वमिति वक्तव्यम्। तथा च अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यत्वं "दण्डी पुरुषः" इति ज्ञाने नास्ति। यतः दण्डी पुरुषः इति ज्ञाननिष्ठकार्यतानिरूपितदण्डप्रत्यक्षनिष्ठकारणतावच्छेदकं न भवति अनुभवत्वम्।यतः दण्डप्रत्यक्षेण यथा "दण्डी पुरुषः" इति ज्ञानं भवति तथा दण्डस्मरणेनापि भवति तत्र च अनुभवत्वं नास्तीति तस्य न कारणतावच्छेदकत्वम्। किन्तु दण्डज्ञानत्वमेव कारणतावच्छेदकं। अतः अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यता विशिष्टबुद्धौ नास्तीति न अतिव्याप्तिः। तादृशानुभवजन्यत्वं भावनायामेव अस्तीति समन्वयः।

**पुनः प्रश्नः**

एवं रीत्या परिष्कारे कृते स्मृतिहेतुत्वदलं व्यर्थं स्यात् । तथाहि – अनुभवध्वंसे अतिव्याप्तिवारणाय हि तद्दत्तम्। तददानेऽपि इदानीं नातिव्याप्तिः संभवति तत्र अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यत्वं नास्ति। ध्वंसं प्रति प्रतियोगिनः प्रतोयोगित्वेन रूपेण कारणत्वं वक्तव्यम्। अथवा तत्तद्ध्वंसत्वावच्छिन्नं प्रति

तत्प्रतियोगित्वेनैव हेतुत्वमित्येव कार्यकारणभावः। तथा च अनुभवध्वंसनिष्ठजन्यतानिरूपितजनकतायां अवच्छेदकं प्रतियोगित्वमेव, अथवा तद्व्यक्तित्वमेव नतु अनुभवत्वमिति अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यत्वं नास्ति इति कृत्वा अनुभवजन्यत्वनिवेशेनैव अतिव्याप्तिवारणात् स्मृतिहेतुत्वदलं व्यर्थम्।

**समाधानम्**

स्मृतिहेतुत्वदलानुपादाने स्मृतावेव अतिव्याप्तिः भवति, तथाहि- स्मृतित्वावच्छिन्नं प्रति अनुभवस्य अनुभवत्वेन कारणत्वाङ्गीकारात् स्मृतित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकं ज्ञानत्वं न भवति किन्तु अनुभवत्वमेवेति कृत्वा अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यत्वस्य स्मृतौ सत्वात् भावनालक्षणस्य अतिव्याप्तिः। तद्वारणाय स्मृतिहेतुत्वदलमावश्यकं भवति। तद्दाने च स्मृतौ च स्मृतिहेतुत्वविरहात् नातिव्याप्तिः। अतः अस्मिन् लक्षणे न कोऽपि दोषः इति शम्।

## बोधप्रश्नाः

1. अयथार्थानुभवः कतिविधः?
2. तर्को नाम कः?
3. सामान्यलक्षणं किम्?
4. भावनालक्षणं किम्?
5. न्यायसूत्रस्य प्रथमं सूत्रं किम्?

## शब्दावली

1. संशयः
2. विपर्ययः

3. भावना
4. स्थितिस्थापकः
5. विशिष्टबुद्धिः
6. अत्यन्ताभावः
7. अन्योन्याभावः
8. काणादम्

## सन्दर्भग्रन्थः


1. तर्कसंग्रहः- न्यायबोधिनीयुक्तः, मास्टर् खेलारी लाल् अण्ड् सन्स्, वाराणसी, १९३०


## सहायकग्रन्थाः


1. तर्कसंग्रहन्यायबोधिनी – बालमनोरमाव्याख्यासहिता, भार्गवपुस्तकालयम्, वाराणसी, १९५०
2. तर्कसंग्रहन्यायबोधिनी – सीताव्याख्यासहिता, कामेश्वरसिंह दर्भङ्गा संस्कृतविश्वविद्यालयः, दर्भङ्गा, १९८४


## बोधप्रश्नोत्तराणि

1. त्रिविधः – संशयविपर्ययतर्कभेदात्
2. व्याप्यारोपेण व्यापकारोपः तर्कः
3. नित्यत्वे सति अनेकसमवेतत्वम्
4. अनुभवजन्यत्वे सति स्मृतिहेतुत्वम्
5. "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः"

**अभ्यासप्रश्नाः**

1. अयथार्थानुभवप्रभेदान् निरूप्य तेषां क्रमशः लक्षणसमन्वयं कुरुत
2. भावनाविचारं यथाग्रन्थं व्याख्यात
3. न्यायसूत्रोक्तपदार्थानां सप्तपदार्थेषु अन्तर्भावं कुरुत

## खण्डः 4

**पाठपरिचयः**

- प्रस्तावना
- उद्देश्यम्
- मूलम्
- विषयसारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

मीमांसाशास्त्रस्य प्रकरणग्रन्थेषु अन्यतमः अर्थसंग्रहाभिधः ग्रन्थः। अस्मिन् ग्रन्थे मीमांसाशास्त्रीयप्रमेयानि संग्रहेन निरूपितानि। येन अध्ययनेन बालानामपि सरलत्या तच्छास्त्रप्रवेशो भवेत्। तस्य ग्रन्थस्य आदितः अधिकारविधिपर्यन्तभागः अस्मिन् खण्डे प्रतिपाद्यते। तत्र आदौ धर्मप्रतिपादकत्वात् मीमांसाशास्त्रस्य धर्मलक्षणं प्रतिपादितम्। तथाहि – वेदप्रतिपाद्यः प्रयोजनवान् अर्थः इति तल्लक्षणम्। अनन्तरं भावना विचारिता, तस्याः द्वैविध्यमपि निरूपितम् तथाहि सा भावना द्विविधा शाब्दी आर्थी चेति। द्वे अपि अंशत्रयविशिष्टे भवतः इति निरूपितम्। ततः परं वेदः विचारितः सच पञ्चधा भवति विधि-मन्त्र-नामधेय-निषेध-अर्थवादभेदात्। तत्र विधिः नाम अज्ञातार्थज्ञापको वेदभागः सच चतुर्धा भवति उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति। ततः परम् अङ्गताबोधकप्रमाणानि षड् क्रमेण निरूपितानि। एवम् क्रमः तत्प्रभेदश्च संक्षेपेण निरूपितः।

## उद्देश्यम्

- पूर्वमीमांसकानां दर्शनविषये संक्षेपेण परिचयः लभ्यते।
- मीमांसकमतरीत्या धर्मविषये संक्षेपेण परिचयः लभ्यते।
- मीमांसकानां मते अङ्गताबोधकप्रमाणानि ज्ञायन्ते ।
- विधेः प्रकाराः ज्ञायन्ते
- वेदस्य अपौरुषेयत्वं विजानाति

# अर्थसंग्रहः

## प्रथम उपोद्घातविभागः

### मङ्गलश्लोकः

वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः।
कुरुते जैमिनिनये प्रवेशायार्थसंग्रहम् ॥ १ ॥

### शास्त्रारम्भसूत्रम्

(१) अथ परमकारुणिको भगवाञ्जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय। तत्रादौ धर्मजिज्ञासां सूत्रयामास - 'अथातो धर्मजिज्ञासा' (जै. सू. १.१.१) इति। अत्राथशब्दो वेदाध्ययनानन्तर्यवचनः। अतःशब्दो हि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते। 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात्। तथा च वेदाध्ययनानन्तरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतोर्धर्मस्य वेदार्थस्य जिज्ञासा कर्तव्येति शेषः जिज्ञासापदस्य विचारे लक्षणा। अतो धर्मविचारशास्त्रमिदमारम्भणीयमिति शास्त्रारम्भसूत्रार्थः।

### धर्मलक्षणम्

(२) अथ को धर्मः, किं तस्य लक्षणमिति चेत्। उच्यते- यागादिरेव धर्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति। प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति। भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति। अनर्थफलकत्वादनर्थभूते श्येनादावतिव्याप्तिवारणायार्थ इति।

## धर्मो वेदप्रतिपाद्यः

(३) न च 'चोदनालक्षणोऽर्थो धर्मः' (जै. सू. १.१.२) इति सौत्रलक्षणविरोधः, चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम्। तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात्। वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात्।

## धर्मस्वरूपम्

(४) स च यागादिः 'यजेत स्वर्गकामः' इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते। तथा हि। 'यजेत' इत्यत्रास्त्यंशद्वयं यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यस्त्यंशद्वयम् आख्यातत्वं लिङ्त्वं च। तत्राख्यातत्वं दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे। उभाभ्यामप्यंशाभ्यां भावनैवोच्यते।

## भावनालक्षणम्

(५) भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः। सा द्विधा। शाब्दी भावना आर्थी भावना चेति।

## शब्दभावनालक्षणम्

(६) तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना। सा च लिङंशेनोच्यते। लिङ्श्रवणेऽयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमतः प्रतीयते तत् तस्य वाच्यम्। यथा गामानय इत्यस्मिन् वाक्ये गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः। वैदिकवाक्ये तु पुरुषाभावालिङादिशब्दनिष्ठ एव। अत एव शाब्दी भावनेति व्यवह्रियते।

## शब्दभावनाया अंशत्रयम्

(७) सा च भावनांशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यतां च, किं भावयेत् केन भावयेत् कथं भावयेदिति। तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति, एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः। संख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वोति। तस्य च करणत्वं न भावनोत्पादकत्वेन, तत्पूर्वमपि तस्याः शब्दे सत्त्वात्। किंतु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्वर्तकत्वेन वा। इतिकर्तव्यताकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमितिकर्तव्यतात्वेनान् वेति।

## अर्थभावनालक्षणम्

(८) प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना। सा चाख्यातत्वांशेनोच्यते, आख्यात-सामान्यस्य व्यापारवाचित्वात्।

## अर्थभावनाया अंशत्रयम्

(९) साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यतां च, किं भावयेत् केन भावयेत् कथं भावयोदति। तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति। इतिकर्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनान्वेति।

## वेदलक्षणम्

(१०) अथ को वेद इति चेदुच्यते। अपौरुषेयं वाक्यं वेदः। स च विधिमन्त्रनामधेयनिषेधार्थ-वादभेदात् पञ्चविधः।

## द्वितीयो विधिविभागः

### विधिलक्षणम्

तत्राज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थविधानेनार्थवान्। तादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इति विधिर्मानान्तरेणाप्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः। यत्र कर्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा 'दध्ना जुहोति' इत्यत्र होमस्य 'अग्निहोत्रं जुहुयात्' इत्यनेन प्राप्तत्वाद् होमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति। यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते। यथा 'सोमेन यजेत' इत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम्। सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः।

न चोभयविधाने वाक्यभेदः प्रत्येकमुभयस्याविधानात् किं तु विशिष्टस्यैकस्यैव विधानात्।

न च 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति विधिप्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु, 'सोमेन यागं भावयेत्' इति, किं मत्वर्थलक्षणयेति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वासंभवात्।

ननु 'उद्भिदा यजेत पशुकामः' इत्यस्येव 'ज्योतिष्टोमेन' इत्यस्याप्युत्पत्त्याधिकारविधित्वमस्त्विति चेत्। न दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात्। किं च 'ज्योतिष्टोमेन' इत्यस्य उभयविधित्वेऽनेनैव यागस्तस्य फलसंबन्धोऽपि बोधनीय इति सुदृढो वाक्यभेदः। तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्।

### चतुर्विधो विधिः

विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति।

### उत्पत्तिविधिः

तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथा 'अग्निहोत्रं जुहोति' इति। अत्र च विधौ कर्मणः करणत्वेनान्वयः। 'अग्निहोत्रहोमेनेष्टं भावयेत्' इति।

ननु यागस्य द्वे रूपे द्रव्यं देवता च। तथा च रूपाश्रवणे 'अग्निहोत्रं जुहोति' इति कथमुत्पत्तिविधिः। अग्निहोत्रशब्दस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेत्। न। रूपाश्रवणेऽप्यस्योत्पत्तिविधित्वात्। अन्यथा रूपश्रवणात् 'दध्ना जुहोति' इत्ययमेवोत्पत्तिविधिः स्यात्। तथा च 'अग्निहोत्रं जुहोति' इति वाक्यमनर्थकं स्यात्।

## विनियोगविधिः

अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधिः। यथा 'दध्ना जुहोति' इति। स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नः होमसंबन्धं विधत्ते 'दध्ना होमं भावयेत्' इति।

गुणविधौ च धात्वर्थस्य साध्यत्वेनान्वयः। क्वचिदाश्रयत्वेनापि। यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र 'दधिकरणत्वेनेन्द्रियं भावयेत्'। तच्च किंनिष्ठमित्याकाङ्क्षायां संनिधिप्राप्तहोम आश्रयत्वेनान्वेति।

## विनियोगविधेः श्रुत्यादिषड्प्रमाणानि

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि। एतत्सहकृतेनानेन विधिनाङ्गत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते।

## श्रुतिः

तत्र निरपेक्षो रवः श्रुतिः। सा च त्रिविधा - विधात्री, अभिधात्री, विनियोक्त्री च। तत्राद्या लिङाद्यात्मिका। द्वितीया व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा विनियोक्त्री।

## त्रिविधा विनियोक्त्री श्रुतिः

सापि त्रिविधा - विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति। तत्र विभक्तिश्रुत्या अङ्गत्वं यथा 'व्रीहिभिर्यजेत' इति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। तदपि पुरोडाशप्रकृतितया। यथा पशोर्हृदयादिरूपहविःप्रकृतितया यागाङ्गत्वम्। 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति'

इत्यस्मिन् वाक्ये आरुण्यस्यापि तृतीयाश्रुत्या क्ीरयाङ्गत्वम्। तदपि गोरूपद्रव्यपरिच्छेदद्वारा न तु साक्षात्, अमृतत्वात्।

'व्रीहीन् प्रोक्षति' इति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या। तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम्, तस्य तेन विनाप्युपपत्तेः। किं त्वपूर्वसाधनत्वप्रयुक्तम्। व्रीहीनप्रोक्ष्य यागानुष्ठानेऽपूर्वानुत्पत्तेः। एवं सर्वेष्वङ्गेष्वपूर्वप्रयुक्तमङ्गत्वं बोध्यम्। एवम् 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्र द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्। 'यदाहवनीये जुहोति' इत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या। एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः।

'पशुना यजेत' इत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम्। 'यजेत' इत्याख्याताभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेव। एकपदश्रुत्या च यागाङ्गत्वम्।

### अमूर्तमपि भावनाङ्गं भवति

न चामूर्तायास्तस्याः कथं भावनाङ्गत्वमिति वाच्यम्। कर्तृपरिच्छेदद्वारा तदुपपत्तेः। कर्ता चाक्षेपलभ्यः। आख्यातेन हि भावनोच्यते। सा च कर्तारं विनानुपपन्नेति तमाक्षिपति।

### श्रुतिर्लिङ्गादिभ्यः प्रबला

सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला। लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किंतु कल्प्यः। यावच्च तैर्विनियोजकशब्दः कल्प्यते तावत् प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात्। अत एवैन्द्या लिङ्गान्नेन्द्रोपस्थानार्थत्वम्। किंतु 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इत्यत्र गार्हपत्यमिति द्वितीया श्रुत्या गार्हपत्योपस्थानार्थत्वम्।

### लिङ्गम्

शब्दसामर्थ्यं लिङ्गम्। यथाहुः 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति। सामर्थ्यं रूढिरेव। तेन समाख्यातोऽस्याभेदः। यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्गशब्दस्य भिन्नत्वात्। तेन

'बर्हिर्देवसदनं दामि' इति मन्त्रस्य कुशलवनाङ्गत्वं न तूलपादिलवनाङ्गत्वम्। तस्य 'बर्हिर्दामि' इति लिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात्। एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः।

### लिङ्गं वाक्यादिभ्यो बलवत्

तदिदं लिङ्गं वाक्यादिभ्यो बलवतः। अत एव 'स्योनं ते सदनं कृणोमि' इति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वं 'सदनं कृणोमि' इति लिङ्गात् न तु वाक्यात्।

### वाक्यम्

समभिव्याहारो वाक्यम्। समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम्। यथा 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति'। अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णताया जुह्वङ्गत्वम्।

न चानर्थक्यम्। अन्यथापि जुह्वाः सिद्धत्वादिति वाच्यम्। जुहूशब्देन तत्साध्यापूर्वलक्षणात्। तथा च वाक्यार्थः। पर्णतयावत्तहविर्धारणद्वारा जुह्वपूर्वं भावयेदिति। एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्णताया वैयर्थ्यम्। अवत्तहविर्धारणद्वारेति चावश्यं वक्तव्यम्। अन्यथा स्रुवादिष्वपि पर्णतापत्तेः।

सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु। तत्र चोदकेनापि तत्प्राप्तिसंभवात् पौनरुक्त्यापत्तेः।

### प्रकृतिविकृत्यनारम्यविधिलक्षणम्

यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिः। तत्प्रकरणे सर्वाङ्गपाठात्। यत्र न सर्वाङ्गोपदेशः सा विकृतिः। यथा सौर्यादिः। तत्र कतिपयाङ्गानामतिदेशेन प्राप्तत्वात्। अनारभ्यविधिः सामान्यविधिः।

### वाक्यं प्रकरणादिभ्यो बलवत्

तदिदं वाक्यं प्रकरणादिभ्यो बलवत्। अत एव 'इन्द्राग्नी इदं हविः' इत्यादेरेकवाक्यत्वाद्दर्शाङ्गित्वं न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम्।

### प्रकरणम्

उभयाकाङ्क्षा प्रकरणम्। यथा प्रयाजादिषु। 'समिधो यजति' इत्यादिवाक्ये फलविशेषस्य अनिर्देशात् 'समिद्यागेन भावयेत्' इति बोधानन्तरं 'किम्' इत्युपकार्याकाङ्क्षा। दर्शपूर्णमासवाक्येऽपि 'दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्' इति बोधानन्तरं 'कथम्' इत्युपकारकाकाङ्क्षा। इत्थं चोभयाकाङ्क्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्।

### प्रकरणं द्विविधम्

तच्च प्रकरणं द्विविधम्। महाप्रकरणमवान्तरप्रकरणं चेति।

### महाप्रकरणम्

तत्र मुख्यभावनासंबन्धिप्रकरणं महाप्रकरणम्। तेन च प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्।

एतच्च प्रकृतावेव उभयाकाङ्क्षायाः संभवान्न तु विकृतौ। तत्र 'प्रकृतिवद्विकृतिः कर्तव्या' इत्यतिदेशेन कथंभावाकाङ्क्षाया उपशमेनापूर्वाङ्गानामप्युभयाकाङ्क्षया विनियोगासंभवात्। तस्मादपूर्वाङ्गानां स्थानादेव विकृत्यर्थत्वम्।

### अवान्तरप्रकरणम्

अङ्गभावनासंबन्धिप्रकरणमवान्तरप्रकरणम्। तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम्। तच्च संदशेनेव ज्ञायते। तदभावे चाविशेषात् सर्वेषां फलभावनाकथंभावेन ग्रहणप्रसङ्गेन प्रधानाङ्गत्वापत्तेः।

### संदंशलक्षणम्

एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वं संदंशः। यथाभिक्रमणे। तद् हि 'समानयते जुह्वाम् उपभृतस्तेजो वा ' इत्यादिना प्रयाजानुवादेन किंचिदङ्गं विधाय विधीयते' यस्यैवं विदुषः

प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान् तुदते। अभिक्रामं जुहोत्यभिजित्यै' इति। तदनन्तरं 'यो वै प्रयाजानां मिथुनं वेद' इत्यादिना किंचिदङ्गं विधीयते। अतः प्रयाजाङ्गमध्ये विहितमभिक्रमणं तदङ्गम्। 'प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेत्' इति ज्ञाते 'कथमेभिरपूर्वं कर्तव्यम्' इति कथंभावाकाङ्क्षायाः सत्त्वात्। सा च संदंशपठितैरभिक्रमणादिभिः शाम्यति। न चाङ्गभावनायाः कथंभावाकाङ्क्षाभावः, भावनासामान्येन तत्रापि तत्संभवात्।

## प्रकरणं क्रियाया एव विनियोजकम्

तदिदं प्रकरणं क्रियाया एव साक्षाद्विनियोजकं द्रव्यगुणयोस्तु तद्वारा। तथा हि। 'यजेत स्वर्गकामः' इत्यत्र फलभावनायां कथंभावाकाङ्क्षायां संनिधिपठिताश्रूयमाणफलकं क्रियाजातमुपकार्या-काङ्क्षयेतिकर्तव्यतात्वेनान्वेति। क्रियाया एव लोके कथंभावाकाङ्क्षायामन्वयदर्शनात्। न हि 'हस्तेन कुठारेण च्छिन्द्यात्' इत्यत्र कथंभावाकाङ्क्षायामुच्चार्यमाणोऽपि हस्तोऽन्वेति। किंतु हस्तेनोद्यम्य निपात्येति उद्यमननिपातने एव। हस्तश्च तद्वारैवान्वेतीति सार्वजनीनमेतत्।

## प्रकरणं स्थानादिभ्यो बलवत्

इदं च स्थानादिभ्यो बलवत्। अत एव 'अक्षैर्दीव्यति' 'राजन्यं जिनाति' इति देवनादयो धर्मा अभिषेचनीयसंनिधौ पठिता अपि स्थानान्न तदङ्गं, किंतु प्रकरणाद्राजसूयाङ्गम्।

## स्थानम्

देशसामान्यं स्थानम्। तद्विविधं पाठसादेश्यमनुष्ठानसादेश्यं चेति। स्थानं क्रमश्चेत्यनर्थान्तरम्। पाठसादेश्यमपि द्विविधं यथासङ्ख्यपाठः संनिधिपाठश्चेति।

## पाठसादेश्येन विनियोगः

तत्र 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' 'वैश्वानरं द्वादशकपालं निर्वपेत्' इत्येवं क्रमविहितेषु 'इन्द्राग्नी रोचना दिवः' इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवंरूपो

विनियोगो यथासंख्यपाठात्। प्रथमपडितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात्। एवं द्वितीयमन्त्रस्यापि।

वैकृताङ्गानां प्राकृताङ्गानुवादेन विहितानां संदेशपतितानां विकृत्यर्थत्वं संनिधिपाठात् यथा आमनहोमानाम्। तेषां हि कैमर्थ्याकाङ्क्षायां फलं विकृत्यपूर्वमेव भाव्यत्वेन संबध्यते, उपस्थितत्वात्। स्वतन्त्रफलकत्वे विकृतिसंनिधिपाठानर्थक्यापत्तेः।

### अनुष्ठानसादेश्येन विनियोगः

पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात्। औपवसथ्येऽह्नि अग्नीषोमीयः पशुरनुष्ठीयते। तस्मिन्नेव दिने ते धर्माः पठ्यन्ते। अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितं पश्वपूर्वमेव भाव्यत्वेन संबध्यते।

### स्थानं समाख्यातः प्रबलम्

तच्च स्थानं समाख्यातः प्रबलम्। अत एव शुन्धनमन्त्रः सांनाय्यपात्राङ्गं पाठसादेश्यात् न तु पौरोडाशिकमिति समाख्यया पुरोडाशपात्राङ्गम्।

### समाख्या

समाख्या यौगिकः शब्दः। सा च द्विविधा वैदिकी लौकिकी च। तत्र होतुश्चमसभक्षणाङ्गत्वम्, होतृचमस इति वैदिक्या समाख्यया। अध्वर्योस्तत्तत्पदार्थाङ्गत्वम्, लौकिक्या आध्वर्यवमिति समाख्यया। इति संक्षेपः।

तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि।

### द्विविधान्यङ्गानि

एतत्सहकृतेन विनियोगविधिना 'समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेत' इत्येवंरूपेण यानि विनियोज्यन्ते तान्यङ्गानि द्विविधानि, सिद्धरूपाणि क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंख्यादीनि। तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि गुणकर्माणि प्रधानकर्माणि चेति। एतान्येव संनिपत्योपकारकाणि आरादुपकारकाणीति चोच्यन्ते।

### संनिपत्योपकारकाणि

कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म संनिपत्योपकारकम्। यथावघातप्रोक्षणादि। तच्च दृष्टार्थम्, अदृष्टार्थं, दृष्टादृष्टार्थं चेति। तत्र दृष्टार्थमवघातादि, अदृष्टार्थं प्रोक्षणादि, दृष्टादृष्टार्थं पशुपुरोडाशादि। तद्धि द्रव्यत्यागांशेनैव अदृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति।

### आरादुपकारकाणि

द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम्। यथा प्रयाजादि। आरादुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते। संनिपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। इदमेव चाश्रयिकर्मेत्युच्यते। तदेवं निरूपितः संक्षेपतो विनियोगविधिः।

### प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तदविलम्बेऽपि प्रमाणाभाव इति वाच्यम्। विलम्बे हि अङ्गप्रधानविध्येकवाक्यतावगत-तत्साहित्यानुपपत्तिः। विलम्बेन क्रियमाणयोः पदार्थयोः 'इदमनेन सहकृतम्' इति साहित्यव्यवहाराभावात्। स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति। अन्यथा हि 'किमेत-दनन्तरमेतत् कर्तव्यमेतदनन्तरं वा' इति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधिरेव

स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। अत एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमो नाम विततिविशेषः, पौर्वापर्यरूपो वा।

**क्रमे श्रुत्यादिषड्प्रमाणानि**

तत्र षट् प्रमाणानि श्रुति-अर्थ-पाठ-स्थान-मुख्य-प्रवृत्त्याख्यानि।

**श्रुतिक्रमः**

तत्र क्रमपरवचनं श्रुतिः। तच्च द्विविधम्। केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति। तत्र 'वेदं कृत्वा वेदिं करोति' इति केवलक्रमपरं वेदिकरणादेर्वचनान्तरप्राप्तत्वात्। 'वषट्कर्तुः प्रथमभक्षः' इति तु क्रमविशिष्टपदार्थपरम्। एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात्।

सेयं श्रुतिरितरप्रमाणापेक्षया बलवती। तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात्। अत एवाश्विनग्रहस्य पाठक्रमातृतीयस्थाने ग्रहणप्रसक्तौ' 'आश्विनो दशमो गृह्यते' इति वचनाद्दशमस्थाने ग्रहणमित्युक्तम्।

**अर्थक्रमः**

यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः। यथा 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्यग्निहोत्रयवागूपाकयोः। अत्र हिं यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते।

स चायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने क्लृप्तप्रयोजनबाधोऽदृष्टार्थत्वं च स्यात्। न हि होमानन्तरं क्रियमाणस्य पाकस्य किंचिद्दृष्टं प्रयोजनमस्ति।

**पाठक्रमः**

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। तस्माच्च पदार्थानां क्रम आश्रीयते। येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति। यथाप्रत्ययं च पदार्थानामनुष्ठानम्। स च पाठो द्विविधः- मन्त्रपाठो ब्राह्मणपाठश्चेति। तत्राग्नेया- ग्नीषोमीययोस्तत्तद्याज्यानुवाक्यानां पाठात् यः क्रम आश्रीयते स मन्त्रपाठात्।

स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलीयान्, अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रपाठस्यान्तरङ्गत्वात्। ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्तव्यमिति अवबोध्य कृतार्थम्। मन्त्राः पुनः प्रयोगकाले व्याप्रियन्ते, अनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात्। तत्क्रमस्य च मन्त्रक्‍्रमाधीनत्वाद् अन्तरङ्गोऽयं मन्त्रपाठः।

प्रयाजानां 'समिधो यजति' 'तनूनपातं यजति' इत्येवंविधपाठक्रमाद् यः क्रमः स ब्राह्मणपाठक्रमात्। यद्यपि ब्राह्मणवाक्यान्यर्थे विधाय कृतार्थानि तथापि प्रयाजादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्‍्रमस्मारकत्वेन स्वीक्रियन्ते।

**स्थानक्रमः**

स्थानं नामोपस्थितिः। यस्य हि देशे योऽनुष्ठीयते तत्पूर्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम्। अत एव साद्यस्क अग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात्। तस्मिन् देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममुपस्थितिः।

तथा हि। ज्योतिष्टोमे त्रयः पशुयागाः - अग्नीषोमीयः, सवनीयः अनुबन्ध्यश्चेति। ते च भिन्नदेशाः - अग्नीषोमीय औपवसथ्येऽह्नि, सवनीयः सुत्याकाले, अनुबन्ध्यस्त्वन्ते। साद्यस्को नाम यागविशेषः। स चाव्यक्तत्वाज्ज्योतिष्टोमविकारः। अतस्ते त्रयोऽपि पशुयागाः साद्यस्के चोदकप्राप्ताः। तेषां च तत्र साहित्यं श्रुतं 'सह पशूनालभेत' इति। तच्च साहित्यं सवनीयदेशे, तस्य प्रधानप्रत्यासत्तेः, स्थानातिक्रमसाम्याच्च। सवनीयदेशे ह्यनुष्ठानेऽग्नीषोमीयानुबन्ध्ययोः स्वस्वस्थानातिक्रमो भवति। अग्नीषोमीयदेशे त्वनुष्ठाने सवनीयस्य स्वस्थानातिक्रममात्रम्। अनुबन्ध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्यात्। एवमनुबन्ध्यदेशेऽग्नीषोमीयस्य द्रष्टव्यः स्थानातिक्रमः।

तथा च सवनीयदेशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानम्। आश्विनग्रहणानन्तरं हि सवनीयदेशः। प्रकृतौ 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति'

इत्याश्विनग्रहणानन्तरं सवनीयो विहित इति साद्यस्क्रेऽप्याश्विनग्रहणे कृते सवनीय एवोपस्थितो भवति। अतो युक्तं तस्य स्थानात् प्रथममनुष्ठानमितरयोस्तु पश्चादित्युक्तम्।

**मुख्यक्रमः**

प्रधानक्रमेण योऽङ्गानां क्रमः स मुख्यक्रमः। येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण तेषामङ्गान्यनुष्ठीयन्ते चेत्, तदा सर्वेषामङ्गानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति। व्युत्क्रमेणानुष्ठाने केषाञ्चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषांचिदत्यन्तं व्यवधानं स्यात्। तच्चायुक्तं, प्रयोगविध्यवगतसाहित्यबाधापत्तेः। अतः प्रधानक्रमोऽप्यङ्गक्रमे हेतुः।

अत एव प्रयाजशेषेणादावाग्नेयहविषोऽभिघारणं पश्चादैन्द्रस्य दध्नः, आग्नेयैन्द्रयागयोः पौर्वापर्यात्। एवं च द्वयोरभिघारणयोः स्वस्वप्रधानेन तुल्यमेकान्तरितं व्यवधानम्। व्युत्क्रमेणाधारे त्वाग्नेयहविरभिघारणाग्नेययागयोरत्यन्तमव्यवधानम्, ऐन्द्रदध्यभिघारणैन्द्रयागयोर्द्व्यन्तरितं व्यवधानम्। तच्चायुक्तमित्युक्तमेव।

स च मुख्यक्रमः पाठक्रमाद्दुर्बलः। मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः। पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान्।

स चायं मुख्यक्रमः प्रवृत्तिक्रमाद् बलवान्। प्रवृत्तिक्रमे हि बहूनामङ्गानां प्रधानविप्रकर्षात्, मुख्यक्रमे तु संनिकर्षात्।

**प्रवृत्तिक्रमः**

सहप्रयुज्यमानेषु प्रधानेषु संनिपातिनामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद् यः क्रमः स प्रवृत्तिक्रमः। यथा प्राजाप्रत्यपश्वङ्गेषु। प्राजापत्या हि 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इति वाक्येन तृतीयानिर्देशात् सेतिकर्तव्यताका एककालत्वेन विहिताः। अतस्तेषां तदङ्गानां चोपाकरणनियोजनप्रभृतीनां साहित्यं संपाद्यम्। तच्च प्राजापत्यपशूनां संप्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुपपद्यते। तदङ्गानां चोपाकरणादीनां युगपदनुष्ठानमशक्यम्। अतस्तेषां

साहित्यमव्यवहितानुष्ठानात् संपाद्यम्। तच्चैकस्योपाकरणं विधायापरस्योपाकरणं विधेयम्। एवं नियोजनादिकमपि। तथा च प्राजापत्येषु कस्माच्चित् पशोरारभ्य एकं सर्वत्रानुष्ठाय द्वितीयादिपदार्थस्तेनैव क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः। सोऽयं श्रुत्यादिभ्यो दुर्बलः।

तदेवं संक्षेपतो निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः।

## अधिकारविधिः

कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः। कर्मजन्यफलस्वाम्यं कर्मजन्यफल-भोक्तृत्वम्। स च 'यजेत स्वर्गकामः' इत्यादिरूपः। स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। 'यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेत्' इत्यादिनाऽग्निदाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते। एवं 'अहरहः सन्ध्यामुपासीत' इत्यादिना शुचिविहितकालजीविनः संध्योपासनजन्यप्रत्यवायपरिहाररूप-फलस्वाम्यं बोध्यते।

तच्च फलस्वाम्यं तस्यैव योऽधिकारविशिष्टः। अधिकारश्च स एव यद्विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते। यथा काम्ये कर्मणि फलकामना, नैमित्तिके कर्मणि निमित्तनिश्चयः, नित्ये संध्योपासनादौ शुचिविहितकालजीवित्वम्। अत एव 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य विदधतापि न स्वाराज्यमात्रकामस्य तत्फलभोक्तृत्वं प्रतिपाद्यते, किंतु राज्ञः सतः स्वाराज्यकामस्यैव, राजत्वस्याप्यधिकारिविशेषणत्वेन श्रवणात्।

क्वचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणम्। यथाध्ययनविधिसिद्धा विद्या। क्रतुविधीनामर्थज्ञानापेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः। एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमत्ता। अग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः। एवं सामर्थ्यमपि। 'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी' इति न्यायात् समर्थं प्रत्येव विधिप्रवृत्तेः। तदेवं निरूपितो विधिः।

## विषयसारः

अत्र प्रधानतया ये विषयाः प्रतिपादिताः ते अत्र साररूपेण संगृह्यन्ते छात्राणां प्रयोजनाय-

## धर्मलक्षणम्

अस्मिन् खण्डे प्रथमतः विचार्यविषयः तावत् धर्मः। मीमांसादर्शनस्य प्रणेता महर्षिः जैमिनिः द्वादशलक्षणीग्रन्थस्य प्रारम्भे सूत्रं प्रणिनाय "अथातो धर्मजिज्ञासा" इति । मीमांसादर्शनानुसारेण धर्मो नाम क इति ज्ञातव्यः । धर्मविषये मीमांसासूत्रं हि "चोदनालक्षणोऽर्थो धर्मः" इति । यद्यपि चोदनापदस्य अर्थः प्रेरकत्वम् तथापि अत्र चोदनापदस्य अर्थः विधिः अस्मिन् शास्त्रे । तस्मात् वेदे यत् कर्तव्यत्वेन प्रतिपाद्यते स एव धर्मः इति ज्ञातव्यम् । अर्थसंग्रहकारस्य मते यागादिरेव धर्मः। धर्मस्य लक्षणं हि - वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति । वेदेन प्रतिपाद्यते यः विषयः, यश्च प्रयोजनवान् (अर्थवान्) भवति स धर्मः। तथाहि भोजनं यद्यपि प्रयोजनवत् तथापि तत् स्वाभाविकं, न तु वेदप्रतिपाद्यं, तस्मात् भोजनं न धर्मः । श्येनादियागः वेदेन प्रतिपाद्यते चेत् अपि न धर्मः, यतो हि तत्र अर्थवत्त्वं नास्ति, नरकाद्यनर्थवत्त्वम् एव अस्ति । स्वाध्यायोऽध्येतव्यः इति वेदवाक्येन प्रत्यहं वेदपाठः कर्तव्यत्वेन विधीयते, अत्र अर्थवत्त्वम् अपि विद्यते इति कारणात् स्वाध्यायः धर्मः इति ज्ञातव्यम् । यजेत स्वर्गकामः इति वेदवाक्येन विधीयते यत् यः स्वर्गम् इच्छति सः यागं कुर्यात् इति, अत्र वेदप्रतिपाद्यत्वम् अस्ति, अर्थवत्त्वम् अपि अस्ति इति कारणात् अयं यागः धर्मः।

## भावनाविचारः

अनन्तरं भावना विचार्यते। यजेत स्वर्गकामः इत्यादिवाक्येन स्वर्गम् उद्दिश्य पुरुषं प्रति यागः विधीयते । यजेत इत्यत्र अंशद्वयं विद्यते यजिधातुः प्रत्ययः च। प्रत्यये अपि अंशत्रयद्वयम् विद्यते - आख्यातत्वम् लिङ्त्वम् च। तत्र आख्यातत्वम् दशलकारेषु अपि साधारणम्, लिङ्त्वं तु लिङि एव विद्यते। ननु का नाम भावना इति चेत् - उच्यते भावना नाम भवितुर्भवनानुकूलः भावयितुः व्यापारविशेषः इति।

अस्यार्थः हि उत्पद्यमानस्य उत्पत्त्यनुकूलः उत्पादयितुः प्रयोजकस्य व्यापारविशेषः भावना इति । यथा पाके उत्पद्यमानस्य ओदनस्य उत्पत्त्यनुकूलः देवदत्तस्य व्यापारविशेषः भावना इत्यर्थः । यथा यजेत स्वर्गकाम इत्यत्र उत्पद्यमानस्य यागस्य स्वर्गस्य वा उत्पत्त्यनुकूलः स्वर्गकामस्य व्यापारः, उत्पद्यमानायाः च स्वर्गकामप्रवृत्तेः उत्पत्त्यनुकूलः लिङः व्यापारविशेषः।

## भावनाद्वैविध्यम्

सा च भावना द्विधा- शाब्दी भावना आर्थी भावना चेति । शाब्दी भावना नाम – पुरुषप्रवृत्त्यनुकूलः भावयितुः व्यापारविशेषः। सा च लिङ् इति अंशेन उच्यते। लिङ्श्रवणे अयं मां प्रवर्तयति, मत्प्रवृत्त्यनुकूलव्यापारवान् अयम् इति शाब्दबोधः नियमेन प्रतीयते । यत् यस्मात् शब्दात् नियमतः प्रतीयते तत् तस्य वाच्यम् । यथा - गाम् आनय इति वाक्ये गोशब्दस्य गोत्वम् वाच्यम्। स च व्यापारविशेषः लौकिकवाक्ये पुरुषनिष्ठः अभिप्रायविशेषः । वैदिकवाक्ये तु पुरुषाभावात् लिङ्गादिशब्दनिष्ठः एव। अत एव **शाब्दीभावना** इति व्यवह्रियते । प्रयोजनेच्छाजनितक्रियाविषयव्यापारः **आर्थीभावना** । प्रयोजनस्य स्वर्गादिरूपफलस्य इच्छया रागादिविशेषेण जनितः यः यागादिक्रियाविषयः पुरुषस्य व्यापारविशेषः सा आर्थी भावना। सा च आख्यातत्वांशेन उच्यते, यतो हि आख्यातसामान्येन व्यापारः बोध्यते ।

## विधिविचारः तद्विभागश्च

मीमांसकमते अपौरुषेयं वाक्यं वेदः। सः च वेदः - विधिः मन्त्रः नामधेयः निषेधः अर्थवादः च इति पञ्चविधः। तत्र प्रथमो विधिः।तन्निरूप्यते-

## विधिः -

अज्ञातस्य अर्थस्य ज्ञापकः वेदभागः विधिः इति उच्यते। यथा अग्निहोत्रं जुहुयात् स्वर्गकामः इति विधिः। यः स्वर्गम् इच्छति सः अग्निहोत्रयागं कुर्यात् इति अस्य अर्थः । अयं विधिः वेदं विना न अन्येन

केनापि प्रमाणेन ज्ञातुं शक्यते । तस्मात् अज्ञातस्य अर्थस्य ज्ञापकत्वात् इदं वेदवाक्यं विधिवाक्यम् इति उच्यते।

स च विधिः चतुर्विधः - उत्पत्तिविधिः, विनियोगविधिः अधिकारविधिः, प्रयोगविधिः चेति ।

1. **उत्पत्तिविधिः**

तत्र कर्मस्वरूपमात्रबोधकः विधिः उत्पत्तिविधिः । यथा - अग्निहोत्रं जुहोति इति । अत्र च विधौ कर्मणः करणत्वेन अन्वयः । अग्निहोत्रहोमेन इष्टं भावयेत् इति ।

2. **विनियोगविधिः**

अङ्गप्रधानसम्बन्धबोधकः विधिः विनियोगविधिः। यथा दध्ना जुहोति इति । स हि तृतीयया प्रतिपन्नस्य अङ्गभावस्य दध्नः होमसम्बन्धं विधत्ते दध्ना होमं भावयेत् इति ।

प्रसंगात् संक्षेपेण अङ्गताबोधकप्रमाणानि निरूप्यन्ते-

## अङ्गताबोधकप्रमाणानि

विनियोगविधेः सहकारिभूतानि षट् प्रमाणानि सन्ति । तानि हि श्रुति-लिङ्ग-वाक्य-प्रकरणस्थान-समाख्यारूपाणि ।

1. **श्रुतिः**

तत्र निरपेक्षः रवः श्रुतिः । अत्र निरपेक्षपदेन प्रमाणान्तरनिरपेक्षः इत्यर्थः। तेन यः शब्दः अन्यप्रमाणं न अपेक्षते, स शब्दः श्रुतिः इत्यर्थः । सा त्रिविधा - विधात्री, अभिधात्री, विनियोक्त्री च।

2. **लिङ्गम्**

शब्दसामर्थ्यं लिङ्गम्। तथाहि - सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते इति वार्तिकमस्ति। सामर्थ्यं रूढिः एव। तथाहि- बर्हिर्देवसदनं दामि इति मन्त्रस्य कुशलवनाङ्गत्वम्, न तु उपलादिलवनाङ्गत्वम् ।

## 3. वाक्यम्

समभिव्याहारः वाक्यम्। समभिव्याहारः नाम सहोच्चारणम् । यथा - यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति इत्यत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णतायाः जुह्वङ्गत्वम्।

## 4. प्रकरणम्

उभयाकाङ्क्षा प्रकरणम् । परस्परस्य वाक्यद्वयस्य आकाक्षा विद्यते चेत् तत् प्रकरणम् इति उच्यते। तथाहि - प्रयाजादिषु 'समिधो यजति' इत्यादिवाक्ये फलविशेषस्य अनिर्देशात् समिद्यागेन भावयेत् इति शाब्दबोधानन्तरं किम् इति फलाकाङ्क्षा भवति।एवं दर्शपूर्णमासवाक्ये अपि 'दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्' इति शाब्दबोधानन्तरं कथम् इति इतिकर्तव्यताकाङ्क्षा भवति । इत्थं च उभयाकाङ्क्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्। तच्च प्रकरणं पुनः द्विविधम्- महाप्रकरणम् चेति तत्र मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम्। तेन च प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्। अङ्गभावनासम्बन्धि प्रकरणम् अवान्तरप्रकरणम् । तेन च अभिक्रमणादीनां प्रयाजाद्यङ्गत्वम् ।

## 5. स्थानम्

देशसामान्यं स्थानम्। स्थानम् इति पदेन सन्निधिविशेषत्वं ज्ञेयम् । स्थानं क्रमः च इति न अर्थान्तरम्। तद् द्विविधम् । पाठसादेश्यम् अनुष्ठानसादेश्यं चेति । पाठसादेश्यम् अपि द्विविधम् - यथासन्निधिपाठः यथासंख्यपाठः चेति।

## 6. समाख्या

तत्र यौगिकः शब्दः समाख्या । शब्दः चतुर्धा - यौगिकः, रूढः, योगरूढः, यौगिकरूढः चेति। एतेषु आध्वर्यवं याचकः इत्यादियौगिकः शब्दः समाख्या इति ज्ञेयम् । सा च समाख्या द्विधा - वैदिकी लौकिकी चेति।

एतेषु बलाबलविचारोपि मूले कृतः पूर्वपूर्वप्रमाणानि उत्तरोत्तरप्रमणापेक्षया बलवन्ति भवन्ति ।

## बोधप्रश्नाः

1. धर्मः कः?
2. विधिः नाम कः?
3. श्रुतिः नाम का?
4. प्रकरणं कतिविधम्?
5. क्रमः कतिविधः?

## शब्दावली

1. चोदना
2. भावना
3. शाब्दीभावना
4. आर्थीभावना
5. विधिः
6. श्रुतिः
7. लिङ्गम्
8. पाठक्रमः
9. अर्थक्रमः
10. अधिकारविधिः

## सन्दर्भग्रन्थः

1. अर्थसंग्रहः – दीपिकाव्याख्यासहितः, चौखाम्बा संस्कृत सीरीज् , वाराणसी, वि.2021.

## सहायकग्रन्थाः

1. अर्थसंग्रहः – रामेश्वरभिक्षुकृतव्याख्यासहितः, ओरियन्टल् बुक् एज्नसी, पूना,1932.
2. अर्थसंग्रहः – तन्त्रप्रकाशिकासहितः - श्रीशैलताताचार्याः, डि.टि. स्वामी पब्लिकेशन्स्, तिरुपतिः,1998

## बोधप्रश्नोत्तराणि

1. यागादिः धर्मः
2. अज्ञातार्थज्ञापको वेदभागः विधिः
3. निरपेक्षो रवः श्रुतिः
4. द्विविधम्- महाप्रकरणम् अवान्तरप्रकरणं चेति
5. द्विविधः – पाठक्रमः अर्थक्रमः चेति

## अभ्यासप्रश्नाः

1. धर्मलक्षणं सदलकृत्यं लिखत
2. भावनालक्षणं प्रतिपाद्य तद्वैविध्यं निरूपयत
3. अङ्गताबोधकप्रमाणानि निरूपयत

## खण्डः 5

### पाठपरिचयः

- प्रस्तावना
- उद्देश्यम्
- मूलम्
- विषयसारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

### प्रस्तावना

वेदः पञ्चधा विभक्तः इति पूर्वखण्डे प्रतिपादितम्। तत्र द्वितीयमन्त्रभागात् अर्थवादान्तभागः अस्मिन् खण्डे प्रतिपाद्यते। आदौ प्रयोगसमवेतार्थस्मारकत्वं मन्त्रत्वमिति मन्त्रलक्षणमुक्त्वा तत्रैव प्रसंगात्

विधित्रयम् निरूपितम्। विधित्रयं च – अपूर्वविधिः, नियमविधिः, परिसांख्याविधिः चेति गीयते मीमांसकैः। तत्र अपूर्वविधिः नाम प्रमाणान्तरेण अप्राप्तस्य प्रापको विधिः। नियमविधिः नाम पक्षे अप्राप्तस्य प्रापको विधिः। एकत्र द्वयोः प्राप्तौ सत्यां एकतरप्रापकः अन्यव्यावृत्तिपरः विधिः। ततः परम् नामधेयविचारः भवति। तत्र अग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रेण भवति इति प्रतिपादितम्। पुरुषस्य निवर्तकं वाक्यं निषेधः इति निषेधाख्यवेदभागः निरूपितः। ततः निषेधपर्युदासयोः भेदः स्थापितः। अनन्तरं अर्थवादः निरूपितः सच प्राशस्त्यनिन्दान्यतररूपं वाक्यम्। तस्य स्वार्थे प्रामाण्यं नास्तीति प्रतिपादितम् ।एवं रीत्या प्रसक्तानुप्रसक्त्या बहवो विचाराः प्रतिपादिताः।

## उद्देश्यम्

- मन्त्राणां स्वरूपं जानाति
- विधित्रयविषये ज्ञानं प्राप्नोति
- अग्निहोत्रशब्दस्य कर्मनामधेयत्वमेव इति सिद्धान्तमवगच्छति
- निषेधपर्युदासयोः भेदं विजानाति
- अर्थवादस्य स्वार्थे प्रामाण्यं नास्तीति अवगच्छति

### तृतीयो मन्त्रविभागः

**मन्त्रः**

प्रयोगसमवेतार्थस्मारका मन्त्राः। तेषां च तादृशार्थस्मारकत्वेनैवार्थवत्त्वम्। न तु तदुच्चारणमदृष्टार्थम्, संभवति दृष्टफलकवेष्टकल्पनाया अन्याय्यत्वात्। न च दृष्टस्यार्थस्मरणस्य प्रकारान्तरेणापि संभवान्मन्त्राम्नानं व्यर्थमिति वाच्यम्। मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्।

**नियमविधिः**

नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः। यथाहुः -

**'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।**

**तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥'** इति।

अस्यार्थः। प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः यथा 'यजेत सर्वकामः' इत्यादिः। स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्थानेन विधानात्।

पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः। यथा 'व्रीहीनवहन्ति' इत्यादिः। कथमस्य पक्षेऽप्राप्तप्रापकत्वमिति चेत्। इत्थम्। अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यतेऽन्वयव्यतिरेक-सिद्धत्वात्। किंतु नियमः। स चाप्राप्तांशपूरणम्। वैतुष्यस्य हि नानोपायसाध्यत्वाद् यदा अवघातं परित्यज्य उपायान्तरं ग्रहीतुमारभते, तदा अवघातस्याप्राप्तत्वेन तद्विधानात्मकमप्राप्तांशपूरणमेवानेन विधिना क्रियते। अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः। पक्षेऽप्राप्तावघातस्य विधानमिति यावत्।

### परिसंख्याविधिः

उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरविधिः परिसंख्याविधिः। यथा - 'पञ्च पञ्चनखा भक्ष्याः' इति। इदं हि वाक्यं न पञ्चनखभक्षणपरं तस्य रागतः प्राप्तत्वात्। नापि नियमपरं पञ्चपञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्यभावात्। अत इदमपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः।

### द्विविधः परिसंख्याविधिः

सा च द्विविधा - श्रौती लाक्षणिकी चेति। तत्र 'अत्र हि एव आवपन्ति' इति श्रौती परिसंख्या। एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्। 'पञ्च पञ्चनखा भक्ष्याः' इति तु लाक्षणिकी। इतरनिवृत्तिवाचकपदा भावात्। अत एवैषा त्रिदोषग्रस्ता।

## **लाक्षणिक्याः परिसंख्याया दोषत्रयम्**

दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति। तदुक्तम्-

**'श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनात्।**

**प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा॥'** इति।

श्रुतस्य पञ्चपञ्चनखभक्षणस्य हानात्, अश्रुताया अपञ्चपञ्चनखभक्षणनिवृत्तेः कल्पनात् प्राप्तस्य चापञ्चपञ्चनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठम्। प्राप्तबाधस्त्वर्थनिष्ठः। इति दिक्।

येषां तु प्रयोगसमवेतार्थस्मारकत्वं न संभवति तदुच्चारणस्यानन्यगत्या अदृष्टार्थकत्वं कल्प्यत इति नानर्थक्यमिति।

## **चतुर्थो नामधेयविभागः**

### **नामधेयम्**

नामधेयानां च विधेयार्थपरिच्छेदकतयार्थवत्त्वम्। तथा हि। 'उद्भिदा यजेत पशुकामः' इत्यत्रोद्भिच्छन्दो यागनामधेयं, तेन च विधेयार्थपरिच्छेदः क्रियते। तथा हि। अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते। यागसामान्यस्याविधेयत्वाद् यागविशेष एव विधीयते। तत्र 'कोऽसौ यागविशेषः' इत्यपेक्षायामुद्भिच्छन्दादुद्भिद्रूपो याग इति ज्ञायते। 'उद्भिदा यागेन पशुं भावयेत्' इत्यत्र सामानाधिकरण्येन नामधेयान्वयात्।

### **नामधेयत्वे निमित्तचतुष्टयम्**

नामधेयत्वं च निमित्तचतुष्टयात्। मत्वर्थलक्षणाभयात् वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशात्, चेति।

### **मत्वर्थलक्षणाभयात् नामधेयत्वम्**

तत्र 'उद्भिदा यजेत पशुकामः' इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात्। तथा हि। न तावदनेन वाक्येन फलं प्रति यागविधानम्, तं प्रति च गुणविधानं युज्यते, वाक्यभेदापत्तेः। उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्यप्राप्तत्वात् गुणविशिष्टकर्मविधानं वाच्यम्। 'उद्भिद्वता यागेन पशुं भावयेत्' इति विशिष्टविधौ च मत्वर्थलक्षणेत्युक्तमेव।

**वाक्यभेदभयात् नामधेयत्वम्**

'चित्रया यजेत पशुकामः' इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदभयात्। तथा हि - न तावदत्र गुणविशिष्टयागविधानं संभवति। 'दधि मधु पयो घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यनेन गुणस्य विहितत्वात् तद्विशिष्टयागविध्यनुपपत्तेः। यागस्य फलसंबन्धे गुणसंबन्धे च विधीयमाने वाक्यभेदः। तस्माच्चित्राशब्दः कर्मनामधेयम्। तथा च 'चित्रायागेन पशुं भावयेत्' इति सामानाधिकरण्येनान्वयान्न वाक्यभेदः। प्रकृतेष्टेरनेकद्रव्यवत्वेन चित्राशब्दवाच्यत्वोपपत्तिः।

**तत्प्रख्यशास्त्रात् नामधेयत्वम्**

'अग्निहोत्रं जुहोति' इत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रात्। तस्य गुणस्य प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्यमानत्वात्, अग्निहोत्रशब्दः कर्मनामधेयमिति यावत्।

नन्वयं गुणविधिरेव कुतो नेति चेत्। न। यदि 'अग्नौ होत्रमस्मिन्' इति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपो गुणो विधेयस्तदा 'यदाहवनीये जुहोति' इत्यनेनैवाग्नेः प्राप्तत्वात्तद्विधानानर्थक्यम्। 'अग्नये होत्रमस्मिन्' इति चतुर्थीसमासमाश्रित्य अग्निदेवतारूपगुणोऽनेन विधीयत इति चेत्। न। तद्देवतायाः शास्त्रान्तरेण प्राप्तत्वात्।

**अग्निप्रापकशास्त्रान्तरम्**

किं तच्छास्त्रान्तरमिति चेत्। 'यदनये च प्रजापतये च सायं जुहोति' इति केचित्। अपरे तु 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा' इति मन्त्रवर्ण एवाग्निरूपदेवताप्रापकः।

नन्वग्नेर्मान्त्रवर्णिकत्वे प्रजापतिदेवतया बाधः स्यात्। मन्त्रवर्णस्य चतुर्थीतो दुर्बलत्वात्। यथाहुः-

**'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।**

**देवताया विधिस्तत्र दुर्बलं तु परं परम्॥'**

इति चेत्। न। 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यत्र न केवलं प्रजापतिविधानम्, किंतु मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चित प्रजापतेः। एवं च न बाधः, केवलप्रजापतिविधानाभावात्। न चात्र समुच्चितोभयविधानमेव कथं नेति वाच्यम्। समुच्चितोभयविधानापेक्षयान्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात्।

एवं प्रयाजेषु समिदादिदेवतानां 'समिधः समिधो अग्न आज्यस्य व्यन्तु' इत्यादिमन्त्रवर्णेभ्यः प्राप्तत्वात्, 'समिधो यजति' इत्यादिषु समिदादिशब्दास्तत्प्रख्यशास्त्रात् कर्मनामधेयम्।

## तद्व्यपदेशात् नामधेयत्वम्

'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्। तेन व्यपदेशादुपमानात्, तदन्यथानुपपत्तेरिति यावत्। तथा हि - यद्विधेयं तस्य स्तुतिर्भवति। यद्यत्र श्येनो विधेयः स्यात्, तदार्थवादैस्तस्यैव स्तुतिः कार्या। अत्र 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इत्यनेनार्थवादेन श्येनः स्तोतुं न शक्यः, श्येनोपमानेनार्थान्तरस्तुतेः क्रियमाणत्वात्। न च श्येनोपमानेन स एव स्तोतुं शक्यते, उपमानोपमेयभावस्य भिन्ननिष्ठत्वात्। यदा तु श्येनसंज्ञको यागो विधीयते तदार्थवादेन श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दः कर्मनामधेयं तद्व्यपदेशादिति।

## उत्पत्तिशिष्टगुणबलीयस्त्वात् नामधेयत्वम्

उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेयनिमित्तमिति केचित्। यथा 'वैश्वदेवेन यजेत' इत्यादौ। अत्रोत्पत्तिशिष्टाग्न्यादीनां बलीयस्त्वाद्वैश्वदेवशब्दस्य विश्वदेवदेवताभिधायकत्वं न संभवतीति कर्मनामधेयत्वम्।

वस्तुतस्तु तत्प्रख्यशास्त्रादेवास्य कर्मनामधेयत्वम्, प्रकृतयागे विश्वदेवरूपगुणसम्प्रतिपन्नशास्त्रस्यार्थवादरूपस्यैव सत्त्वात्। 'यद् विश्वेदेवाः समयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वम्' इति।

## पञ्चमो निषेधविभागः

### निषेधः

पुरुषस्य निवर्तकं वाक्यं निषेधः। निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैव अर्थवत्त्वात्। तथा हि - यथा विधिः प्रवर्तनां प्रतिपादयन् स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति, तथा 'न कलञ्जं भक्षयेत्' इत्यादिनिषेधोऽपि निवर्तनां प्रतिपादयन् स्वनिवर्तकत्वनिर्वाहार्थे निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयति।

### लिङर्थशब्दभावनाया नञर्थेनान्वयः

ननु निषेधवाक्यस्य कथं निवर्तनाप्रतिपादकत्वमिति चेत्, उच्यते। न तावदत्र धात्वर्थस्य नञर्थेनान्वयः, अव्यवधानेऽपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः। न ह्यन्योपसर्जनत्वेन उपस्थितमन्यत्रान्वेति। अन्यथा 'राजपुरुषमानय' इत्यादावपि राज्ञः क्रियान्वयापत्तेः। अतः प्रत्ययार्थस्यैव नञर्थेनान्वयः। तत्रापि नाख्याततवांशवाच्यार्थभावनायाः, तस्या लिडंशवाच्यप्रवर्तनोपसर्जनत्वेनोपस्थिते, किंतु लिडंशवाच्यशब्दभावनायाः, तस्याः सर्वापेक्षया प्रधानत्वात्।

### नञ्स्वभावः

नञश्चैष स्वभावो यत् स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्। यथा 'घटो नास्ति' इत्यादौ'अस्ति' इतिशब्दसमभिव्याहृतो नञ् घटसत्त्वविरोधि घटासत्त्वं गमयति। तद्वदिह लिङ्गमभिव्याहृतो नञ् लिङर्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति। विधिवाक्यश्रवणे 'अयं मां

प्रवर्तयति' इति प्रवर्तनाप्रतीतिवत् निषेधवाक्यश्रवणे 'अयं मां निवर्तयति' इति निवृत्त्यनुकूलव्यापाररूपनिवर्तनायाः प्रतीतेः। तस्मान्निषेधवाक्यस्थले निवर्तनैव वाक्यार्थः।

### प्रत्ययार्थस्य नञर्थान्वये द्विविधं बाधकम्

यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च बाधकं द्विविधम्। 'तस्य व्रतम्' इत्युपक्रमो विकल्पप्रसक्तिश्च।

### प्रथमं बाधकम्

तत्राद्यं 'नेक्षेतोद्यन्तमादित्यम्' इत्यादौ, 'तस्य व्रतम्' इत्युपक्रम्यैतद्वाक्यपाठात्। तथा चात्र पर्युदासाश्रयणम्। तथाहि- व्रतशब्दस्य कर्तव्यार्थे रूढत्वात् 'तस्य व्रतम्' इत्यत्र स्नातकस्य व्रतानां कर्तव्यत्वेनोपक्रमात्। किं तत् कर्तव्यमित्याकाङ्क्षायां 'नेक्षेतोद्यन्तम्' इत्यादिना कर्तव्यार्थ एव प्रतिपादनीयः। अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात्। तथा च नञर्थेन न प्रत्ययार्थान्वयः, कर्तव्यार्थानवबोधात्। विध्यर्थप्रवर्तनाविरोधिनिवर्तनाया एव तादृशनञा बोधनात्, तस्याश्च कर्तव्यार्थत्वाभावात्। तस्मात् 'नेक्षेत' इत्यत्र नञा धात्वर्थविरोध्यनीक्षणसंकल्प एव लक्षणया प्रतिपाद्यते, तस्य कर्तव्यत्वसंभवात्।

'आदित्यविषयकानीक्षणसंकल्पेन भावयेत्' इति वाक्यार्थः। तत्र भाव्याकाङ्क्षायाम् 'एतावता हैनसा वियुक्तो भवति' इतिवाक्यशेषावगतः पापक्षयो भाव्यतयान्वेति। एवं च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव।

न च 'अत्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि संभवात् कथमनीक्षणसंकल्पस्यैव भावनान्वयः' इति वाच्यम्। तस्य कर्तव्यताभावेन प्रकृते भावनान्वयायोग्यत्वात्।

### द्वितीयं बाधकम्

द्वितीयं 'यजतिषु येयजामहं करोति नानुयाजेषु' इत्यादौ। अत्र विकल्पप्रसक्तौ च पर्युदासाश्रयणात्। तथा हि- यद्यत्र वाक्ये नञर्थेन प्रत्ययार्थान्वयः स्यात्, तदा अनुयाजेषु 'ये यजामहे' इति मन्त्रस्य प्रतिषेधः स्यात्, 'अनुयाजेषु येयजामहं न कुर्यात्' इति। स च प्राप्तिपूर्वक एव, प्राप्तस्यैव

प्रतिषेधात्। प्राप्तिश्च 'यजतिषु येयजामहं करोति' इति शास्त्रादेव वाच्या। शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव, न तु बाधः। प्राप्तिमूलरागस्येव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधायोगात्।

न च 'पदे जुहोति' इतिविशेषशास्त्रेण 'आहवनीये जुहोति' इति शास्त्रस्येव 'नानुयाजेषु' इत्यनेन 'यजतिषु येयजामहं करोति' इत्यस्य बाधः स्यादिति वाच्यम्। परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वम्। प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं 'यजतिषु येयजामहम्' इत्यस्यापेक्षणान्न निरपेक्षत्वम्।

**'यजतिषु' इत्यत्र विकल्पस्य अयुक्तत्वात् पर्युदास आश्रयणीयः**

तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव। स च न युक्तः। विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यापातात्। न ह्यनुयाजेषु 'ये यजामहम्' इत्यस्यानुष्ठाने 'नानुयाजेषु' इत्यस्य प्रामाण्यं संभवति, व्रीहियागानुष्ठाने यवशास्त्रस्येव। द्विरदृष्टकल्पना च स्यात्, विधिप्रतिषेधयोरपि पुरुषार्थत्वात्। अतो नात्र प्रतिषेधस्याश्रयणम्, किंतु नञोऽनुयाजसंबन्धमाश्रित्य पर्युदासस्यैव। इत्थं चानुयाजव्यतिरिक्तेषु यजतिषु 'ये यजामहे' इति मन्त्रं कुर्यादिति वाक्यार्थबोधः, नञोऽनुयाजव्यतिरिक्ते लाक्षणिकत्वात्। एवं च न विकल्पः। अत्र च वाक्ये 'ये यजामहे' इति न विधीयत, 'यजतिषु ये यजामहम्' इत्यनेनैव प्राप्तत्वात्। किं तु सामान्यशास्त्रप्राप्त-"येयजामह" इत्यस्यानुवादेन तस्यानुयाजव्यतिरिक्तविषयकत्वं विधीयते। यत् 'यजतिषु येयजामहं करोति' तदनुयाजव्यतिरिक्तेष्विति।

**पर्युदासोपसंहारयोर्भेदः**

नन्वेवं सामान्यशास्त्रप्राप्तस्य विशेषे संकोचनरूपादुपसंहारात् पर्युदासस्य भेदो न स्यादिति चेत्, न। उपसंहारो हि तन्मात्रसंकोचार्थः। यथा 'पुरोडाशं चतुर्धा करोति' इति सामान्यप्राप्तचतुर्धाकरणम् 'आग्नेयं चतुर्धा करोति' इति विशेषादाग्नेयपुरोडाशमात्रे संकोच्यते। पर्युदासस्तु तदन्यमात्रसंकोचार्थ इति ततो भेदः।

**कुत्रचित् विकल्पप्रसक्तावपि प्रतिषेध आश्रयणीयः**

कुत्रचिद्विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणम्। यथा 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादौ। अत्र हि 'अतिरात्रे षोडशिनं गृह्णाति' इति शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणम्, असंभवात्। तथा हि - यद्यत्र षोडशिपदार्थेन नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधः स्यात्। स च न संभवति, 'अतिरात्रे षोडशिनं गृह्णाति' इति प्रत्यक्षविधिविरोधात्। यदि चातिरात्रपदार्थेनान्वयस्तदातिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीति वाक्यार्थबोधः स्यात्, सोऽपि न संभवति, तद्विधिविरोधात्। अतोऽत्रानन्यगत्या शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः। न च विकल्पप्रसक्तिस्तस्याप्यपेक्षणीयत्वात्।

**विकल्पे प्रतिषिध्यमानं नानर्थहेतुः**

इयांस्तु विशेषो यद्विकल्पादेकप्रतिषेधेऽपि प्रतिषिध्यमानस्य नानर्थहेतुत्वम्, विधिनिषेधोभयस्यापि क्रत्वर्थत्वात्। यत्र तु न विकल्पः, प्राप्तिश्च रागत एव, प्रतिषेधश्च पुरुषार्थः, तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वम्, यथा 'न कलञ्जं भक्षयेत्' इत्यादौ कलञ्जभक्षणादेः। तत्र भक्षणनिषेधस्यैव पुरुषार्थत्वात्।

न च 'दीक्षितो न ददाति न जुहोति' इत्यादौ शास्त्रप्राप्तदानहोमादीनां निषेधाद्विकल्पापत्तिरिति वाच्यम्। स्वतः पुरुषार्थभूतदानहोमादीनां निषेधस्य पुरुषार्थत्वाभावेऽपि निषिध्यमानस्यानर्थहेतुत्वात्, यथा क्रतौ स्वस्त्रीगमनादेः। तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसंपादकत्वात्।

**षष्ठोऽर्थवादविभागः**

**अर्थवादः**

प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः। तस्य च लक्षणया प्रयोजनवदर्थपर्यवसानम्। तथाहि - अर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति। स्वार्थमात्रपरत्वे आनर्थक्यप्रसङ्गात्। आम्नायस्य हि क्रियार्थत्वात्। न चेष्टापत्तिः। 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिना सकलवेदाध्ययनं कर्तव्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थपर्यवसायित्वं सूचयतोपात्तत्वेनानर्थक्यानुपपत्तेः।

### अर्थवादो द्विविधः

स द्विविधः, विधिशेषो निषेधशेषश्चेति। तत्र 'वायव्यं श्वेतमालमेत भूतिकामः' इत्यादिविधिशेषस्य 'वायुर्वै क्षेपिष्ठा देवता' इत्यादेर्विधेयार्थप्राशस्त्यबोधकतयार्थवत्त्वम्। 'बर्हिषि रजतं न देयम्' इत्यादिनिषेधशेषस्य 'सोऽरोदीत, यद् अरोदीत् तद् रुद्रस्य रुद्रत्वम्' इत्यादेर्निषेध्यस्य निन्दितत्वबोधकतयार्थवत्त्वम्।

न च प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेन नार्थवादस्यार्थवत्त्वमिति वाच्यम्। आलस्यादिवशादप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात्।

### अर्थवादस्य भेदत्रयम्

स पुनस्त्रेधा। तदुक्तम्-

**'विरोधे गुणवादः स्यादनुवादोऽवधारिते।**

**भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥**' इति।

अस्यार्थः- प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः, यथा 'आदित्यो यूपः' इत्यादिः। यूप आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते। प्रमाणान्तरावगतार्थबोधकोऽर्थवादोऽनुवादः, यथा 'अग्निर्हिमस्य भेषजम्' इति। अत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात्। प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकः अर्थवादो भूतार्थवादः, यथा 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादिः।

## उपसंहारः

एवं च 'यजेत स्वर्गकामः' इत्यादिनिखिलवेदस्य साक्षात् परम्परया वा यागादिधर्मप्रतिपादकत्वं सिद्धम्।

सोऽयं धर्मो यदुद्दिश्य विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः। ईश्वरार्पणबुद्धया क्रियमाणस्तु निःश्रेयसहेतुः। न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः।

**'यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।**

**यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥'**

इति भगवद्गीतास्मृतेरेव प्रमाणत्वात्। स्मृतिचरणे तत्प्रामाण्यस्य श्रुतिमूलकत्वेन व्यवस्थापनात्। इति शिवम्।

**बालानां सुखबोधाय भास्करेण सुमेधसा।**

**रचितोऽयं समासेन जैमिनीयार्थसंग्रहः॥**

**॥श्रीमहामहोपाध्यायलौगाक्षिभास्करविरचितपूर्वमीमांसार्थसंग्रहः समाप्तः॥**

## विषयसारः

अस्मिन् खण्डे ये विषयाः प्रतिपादिताः तस्मात् केचन विषयाः अत्र साररूपेण संगृह्यन्ते।प्रथमतः **मन्त्रः** निरूप्यते-

प्रयोगसमवेतार्थस्मारकाः मन्त्राः इति मन्त्रस्य लक्षणम्। यानि वेदवाक्यानि कर्मानुष्ठानसम्बद्धान् द्रव्यदेवतादीन् पदार्थान् स्मारयन्ति तानि मन्त्रवाक्यानि उच्यन्ते। अनुष्ठानसमवेतार्थबोधकानां मन्त्राणाम् उच्चारणम् अर्थस्मरणरूपदृष्टार्थं क्रियते। अनुष्ठानासमवेतार्थबोधकानां मन्त्राणाम् उच्चारणन्तु अदृष्टार्थं क्रियते। एवं समेषां मन्त्राणां दृष्टार्थकत्वेन अदृष्टार्थकत्वेन वा प्रामाण्यम्।

अत्र प्रसंगात् विधित्रं निरूपितं भवति अर्थसंग्रहे अतः तेषां संग्रहेण परिचयः क्रियते –

1. **अपूर्वविधिः**

प्रत्यक्षादिप्रमाणेन अप्राप्तस्य विषयस्य प्रापकः 'यजेत स्वर्गकाम:' इत्यादिविधिः अपूर्वविधिः । यागः स्वर्गार्थः इति अन्येन प्रमाणेन अप्राप्तम्। अतः स्वर्गार्थं यागस्य विधायकः विधिः अपूर्वविधिः।

2. **नियमविधिः**

पक्षे अप्राप्तस्य विषयस्य प्रापकः विधिः नियमविधिः। यथा 'व्रीहीन् अवहन्ति' इति। नखविदलनपक्षे अप्राप्तस्य अवहननस्य बोधकः विधिः नियमविधिः। कश्चित् तुषविमोकार्थम् अवहननं त्यक्त्वा नखविदलनमिति उपायान्तरं ग्रहीतुम् आरभते। तदा अवघातस्य अप्राप्तत्वात् अप्राप्तांशस्य अवघातस्य प्रापकः 'व्रीहीन् अवहन्ति' इति विधिः नियमविधिः। नियमः नाम अप्राप्तांशस्य पूरणम्।

3. **परिसङ्ख्याविधिः**

पक्षद्वयस्य युगपत् प्राप्तौ अन्यतरस्य पक्षस्य व्यावृत्तिबोधकः विधिः। यथा 'पञ्च पञ्चनखाः भक्ष्याः इति। पञ्चनखोपेतस्य प्राणिनः भक्षणं रागतः एव प्राप्तम्। अतः अयं विधिः भक्षणं न विदधाति। अतः अयम् अपूर्वविधिः न भवति। पञ्चपञ्चनखोपेतस्य भक्षणस्य पाक्षिकप्राप्त्यभावात् युगपदेव प्राप्तत्वात् अयं नियमविधिः न भवति । अतः परिशेषात् पञ्चातिरिक्तपञ्चनखभक्षणस्य निवृत्तिं विधदत् परिसंख्याविधिः भवति। **परि**-वर्जनम, **संख्या**-बुद्धिः।

परिसंख्या द्विविधा - श्रौती परिसंख्या, लाक्षणिकी परिसंख्या इति ।

1. **श्रौती परिसंख्या**

'अत्र हि एव आपयन्ति' इत्यत्र स्तोत्रेषु सामावापसन्दर्भे एवकारेण पवमानातिरिक्तानां स्तोत्राणां व्यावृत्तिः क्रियते । अतः श्रौती परिसंख्या।

2. **लाक्षणिकी परिसंख्या**

'पञ्च पञ्चनखाः भक्ष्याः' इत्यत्र तु लाक्षणिकी परिसंख्या। निवृत्तिबोधकानाम् एवकारादीनाम् अभावात् लक्षणया इतरनिवृत्तिः बोधनीया। अत्र लक्षणया इतरनिवृत्तिः बोधनीया इति परिसंख्या लाक्षणिकी भवति। परिसंख्यायां दोषत्रयम् भवति-

1. **श्रुतहानिः**- पञ्चपञ्चनखभक्षणं श्रुतं चेदपि तस्य परित्यागात् श्रुतहानिः।

2. **अश्रुतकल्पना**- पञ्चातिरिक्तानां पञ्चनखप्राणिनां भक्षणस्य निवृत्तिः अश्रुता। तथापि तस्याः कल्पनात् अश्रुतकल्पना।

3. **प्राप्तबाधः** - इच्छया प्राप्तस्य पञ्चातिरिक्तपञ्चनखभक्षणस्य बाधनात्प्राप्तबाधः।

अत्र श्रुतहानिः, अश्रुतकल्पना च शब्दनिष्ठा, प्राप्तबाधः अर्थनिष्ठः।

**नामधेयम्**

विधेयार्थपरिच्छेदकं वाक्यम् नामधेयम् इति उच्यते। येन वाक्येन विधेयस्य कर्तव्यतया उपदिष्टस्य यागस्य परिच्छेदः भवति, अर्थात् नाम ज्ञायते तत् नामधेयवाक्यम् । तथाहि - उद्भिदा यजेत पशुकामः इति नामधेयस्य उदाहरणम् । अत्र उद्भिदा इति पदेन न यागसामान्यस्य विधानम्, अपि तु उद्भिन्नामकेन यागेन पशुकामः यजेत इति यागविशेषस्य विधानम् ।

**निषेधः**

पुरुषस्य निवर्तकं वाक्यं निषेधः । यदि किञ्चित् कार्यं पुरुषस्य अनर्थजनकं भवेत् तदा वेदवाक्यं तस्मात् कार्यात् पुरुषं निवर्तयति । तथाहि - 'न कलञ्जं भक्षयेत्' इति निषेधवाक्यम् अनर्थजनकात् कलञ्जभक्षणात् पुरुषं निवर्तयति ।

**अर्थवादः**

प्राशस्त्य-निन्दान्यतरपरं वाक्यम् अर्थवादः । यस्य वेदवाक्यस्य स्वार्थप्रतिपादने तात्पर्यं नास्ति, किन्तु यत् वेदवाक्यं प्रशंसाद्वारा निन्दाद्वारा वा विधेयस्य निषेध्यस्य कर्तव्याकर्तव्यत्वे सूचयति तत्

अर्थवादवाक्यम् इति उच्यते । यथा – "वायुर्वै क्षेपिष्ठा देवता" इति वेदवाक्येन वायोः शीघ्रगामित्वम् सूच्यते। वस्तुतः अनेन वायोः प्रशंसा क्रियते। तेन च वायुः शीघ्रफलदाता इति सूच्यते।

## बोधप्रश्नाः

1. मन्त्रलक्षणं किम्?
2. अप्राप्तस्य प्रापको विधिः?
3. परिसंख्याविधिः कतिविधा?
4. अग्निहोत्रशब्दस्य कर्मनामधेयत्वं केन शास्त्रेण?
5. अर्थवादो नाम कः?

## शब्दावली

1. नियमविधिः
2. परिसंख्याविधिः
3. नामधेयम्
4. मन्त्रः
5. पर्युदासः
6. उपसंहारः
7. अर्थवादः
8. निषेधः

## सन्दर्भग्रन्थः


1. अर्थसंग्रहः – दीपिकाव्याख्यासहितः, चौखाम्बा संस्कृत सीरीज् , वाराणसी, वि.2021.

## सहायकग्रन्थाः

1. अर्थसंग्रहः – रामेश्वरभिक्षुकृतव्याख्यासहितः, ओरियन्टल् बुक् एज्नसी, पूना,1932.
2. अर्थसंग्रहः – तन्त्रप्रकाशिकासहितः - श्रीशैलताताचार्याः, डि.टि. स्वामी पब्लिकेशन्स्, तिरुपतिः,1998

## बोधप्रश्नोत्तराणि

1. प्रयोगसमवेतार्थस्मारकत्वम्
2. नियमविधिः
3. द्विविधा श्रौती, लाक्षणिकी
4. तत्प्रख्यशास्त्रेण
5. प्राशस्त्यनिन्दान्यतरवाक्यम्

## अभ्यासप्रश्नाः

1. नियमविधिलक्षणं सदलकृत्यं लिखत
2. अर्थवादस्य स्वार्थे प्रामाण्यमस्ति नवेति विचारयत
3. मीमांसाशास्त्ररीत्या नञर्थं निरूपयत